[illegible]

इन्द्रतत्त्वम्

" इन्द्रो विश्वस्य राजति ॥ (साम)

=

" सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ॥
त्वामभि प्रणोनुमो जेतारमपराजितम् ॥

(जेता माधुच्छन्दसः) ऋ॰ मं॰ १-११-२ ॥

१+

=

"इन्द्रो" वा अयं ज्योतिरात्मा, विद्युता स बर्हिर्धा द्योतते ज्योतिषा स्वेन, स दिव्यो देवतात्मा प्रचेतनः पुरुषः, स वा अयं सचेतनः सन्नमृत एवान्तरोऽस्माकमात्मा, विश्वेषामेव भूतानामचेतसां भुवनानामीष्टे, विश्वेषामेव देवानां मानुषाणां प्राणभृतां चेततेऽन्तः, विश्वाभिरेव परमाभिर्भूतिभिः स प्रपूर्णः, विश्वत एव राजते चिता, तदिन्द्रस्येन्द्रत्वम् ॥ तस्य वा अमुष्य दिव्यस्य ज्योतिरात्मनः, पुरुषस्यैव परमस्यात्मनः, विश्वाभिरेव भूतिभि विश्वमेवेदं पूर्णम्, ताभिरेवासौ तपसा बहिर्धा दिवि ज्योतिषाभ्युदेति, आत्मन एवोदितास्ता इमाः, विश्वा एव विभूतीरधितिष्ठति, विश्वस्मादेव परमः स इन्द्रः, विश्वमेवेदं परीतः चित्तिभिरेव भूतिभिर्विश्वमेवेदं प्रत्यूतः, स्वेनैवामृतत्वेन समेनैव रसेन ज्योतिषा राजते। तदिन्द्रस्येन्द्रत्वम् ॥ असौ विश्वत एव राजमानः, स्वेनैव ज्योतिषा विश्वानेवेमान् प्राणभृतः प्रचेतयति, भूतिभिरेव प्रति जीवनाय विश्वमेवेदं प्रतिष्ठापयति, विश्वस्मिन्नै पुन विश्वानेवास्मान् प्रति जीवयति, स्वयैव वाचा च छन्दसा प्रशास्तीदं विश्वं, विश्वस्यैवास्य प्रतिशासनेन विश्वमेवेदं नियमं, आत्मन एव वशे प्रतिष्ठापयति, आत्मन्येव विश्वं यमयति स्वयम्, इति-वैतदिन्द्रस्यैव प्रतिशासनेन विश्वमेवेदं नियतम्, इन्द्रस्यैव वशे प्रति तिष्ठति, तस्मात् स इन्द्र एव सहसा स्वेन, विश्वमेतत् स्वकं

प्रथितं विश्वतएव प्रतिवर्तयति। तदिन्द्रस्येन्द्रत्वम् ॥ (१+) एतद्वै सुकक्ष आङ्गिरस ऋषिस्तपसाऽन्वपश्यत्, तदृचा वाचाऽन्ववदत्,

"यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ॥
सर्वं तदिन्द्र ते वशे ॥ इति (ऋ॰ सं॰ मं॰ ८-सू॰ ९३, ४ ...

—

॥ ज्येष्ठः इन्द्रः ॥

१ + अथो यत एवेदं भूतं भवद् भव्यं च विश्वम्, तेजश्चापश्च पृथिवी च, एतानि त्रीणि भूतानि त्रिवृदितानि, वियच्च मरुच्च ते उभे, सहैताभ्यां पञ्च तानि, महान्ति प्रथमानि भूतानि भवन्ति, भूर्भुवः स्वः, भूमिरन्तरिक्षं द्यौः, इमानि वै त्रीणि भुवनानि, महश्च जनस्तपः सत्यं च एतानि वै धामानि सप्त, संस्थानानि प्रथितानि, अग्निर्वायुरादित्यश्च इमानि त्रीणि ज्योतींषि, तानि दैवतानि, त्रिषु लोकेषु हितानि प्रतितिष्ठन्ति ॥

विश्वे वै दिव्या देवतात्मानः, प्रचेतनास्ते परोक्षसत्त्वानः, सर्व एवैते पुरुषाः प्राणभृतः सचेतनाः सर्वेषामेव तेषां तनूष्वन्तर्हिताः, येऽन्तरात्मनो जीवसत्त्वानः, स्वयमेवापरोक्षहिताः भवन्ति, इति वै तेभ्य एतेभ्यो विश्वेभ्यो ज्येष्ठं, तदेवास सत्यं वस्तु पूर्णं सत् परमं, यत एव तस्माद् विश्वमाविर्बभूवेदमग्रे, स्वेनैव ज्योतिषा दीप्तिमत् प्रबलम्। स वा अयं पुरुषः समाविर्भवन् पुनर्विश्वत एव रूपेण, सद्य एव स्वेन प्रचेतनेन तपसाऽभ्युदियाय स्वयम्, तत एवान्धं तम उत्ससार, अथो स्वयमेव सम्राजते चिता ज्योतिरात्मा परस्मात् परः, अमुमेवानु पुनः सर्व एवेमे पुरुषाश्चेतनात्मानः सचेतसः प्रतिनन्दन्ते, स इमान् सर्वानेव प्राणभृतः सर्वाः प्रजाः, स्वेनैव रसेन परमेण प्रतिनन्दयति, तस्मात् सर्वेभ्यो वा एतेभ्यः पुरुषेभ्यः, विश्वस्मादेवास्माज्जगतः, परमः स पुरुषः, विश्वैरेव गुरोःसत्त्वैः, विश्वाभिरेव भूतिभिः पूर्णः स इन्द्र एव प्रभवति, सोऽभित एवेन्दति, सर्वेष्वेव धामसु राजते, तदिन्द्रस्येन्द्रत्वम् ॥

१ + तस्मादेव विश्वतो ज्येष्ठः स इन्द्रो विश्वस्यैवास्य प्रभवति। एतद्वै बृहद्दिव आथर्वण ऋषिस्तपसाऽन्वपश्यत्, तदृचा वाचाऽन्ववदत् ॥

"तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ॥
सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥

इति (ऋ० मं० १०-१२०-१)

॥ राजा इन्द्रः ॥

१ +

अथो पुनर्यत एव परमः स पूरुषः, तावता वै स्वेन भूम्ना, भूति धाम्ना स्वेनैव महिम्ना, नाम्ना स्वरूपेण परमेण, सर्वेषामेव जगतां सोऽध्यक्षः, स परमे व्योमन् स्वे पदे प्रति तिष्ठति, केवलः सन् प्रचेतनः स पूरुषः स्वस्मिन्नेव परमे पदे स्वधामनि सम्राजमानः, विश्वेष्वेव भूतेषु भुवनेषु, उत देवेषु मनुष्येषु प्राणभृत्सु, सोऽन्तर्धा बहिर्धा च सन्ततो ज्योतिषा प्रचेतनेन राजते, विश्वमेवेदं प्रति राजयति, स्वयमेवेदं स्वं प्रकाशयति, यथा वा अस्मिँल्लोके रथस्य रथचक्रस्य नाभौ प्रत्यृता अराः, ध्रुवा एव ताः प्रत्यर्पिताः अचलाः प्रति तिष्ठन्ति, ताभ्यो वा अराभ्यः पुनः, बहिर्धा परितः प्रत्यर्पिता नेमिः, सर्वा एव ता अराः समावृणोति, आवृत्तं ताः प्रति सन्नियच्छति, नाभौ तन्मध्यमे पदे तदाणिः प्रतिष्ठिता सती, रथं च रथ चक्रं च प्रतिधारयति । स्वयैव चित्या विधृत्या प्रति चालयति, स वा अयं रथो रथचक्रं च परिवर्ततेऽजस्रम् ॥ एवं वै प्रत्यक्षं विश्वमेतत् प्रतितिष्ठति, विश्वेषामेव मध्ये भुवनानां, पूर्णे मध्यमे पदेऽन्तः, आणिरिवैव सम्राजमानः, सर्वमेवेदं बहिर्धा नेमिरिवैव समावृत्य, परिवर्तमानः स सर्वत एव सम्राजते, स प्रचेतनः अनुवीर्येण स इन्द्रः, विश्वस्यैवास्य राजा स्वयं प्रभवति, तदिन्द्रस्येन्द्रत्वम् ॥

२१

१ + एतद्वै हिरण्यस्तूप आङ्गिरस ऋषिस्तपसाऽन्वपश्यत । तदृचा वाचाऽन्ववदत् ॥

"इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ॥
सेदु राजा क्षयति चर्षणीनामरां न नेमिः परिता बभूव ॥
इति, (ऋ॰ मं॰ १-३२-१५)

=

"इन्द्रो विश्वस्य राजति, इति वै साम्ना तदभिप्रगीतम् ।
"इन्द्रो राजा जगतो य ईशे ॥ इति वै तदनुश्रुतिः ॥

=

॥ ज्येष्ठराजः स इन्द्रो ब्रह्मणस्पतिः ॥

१ + स वा अयं ज्येष्ठराजः स इन्द्र एव ब्रह्मणस्पतिः । विश्वस्यैवाधिपतिः सोऽध्यक्षः, विश्वेषामेव देवानां देवगणानामीशानः, अग्रणीः

वै वसूनां पार्थिवानां वसुपतिः स इष्टः, रुद्राणामेकादशानामन्तरिक्ष्या-
णां, उत सप्तानां मारुतानां सत्पतिः, द्वादशानां वै दिव्यानामादित्यानां
पतिः, भूतानां वै भुवनानां प्राणभृतां मानुषाणां, विश्वेषामेव करणानां
वाचां प्राणानां धियां, संविदां कामानां कर्मणां, उत चित्तीनां परम-
श्चित्पतिः, विश्वेषामेव च छन्दसां ब्रह्मणां जनयिता पिता, परमः
स ऋषिः कविः, सर्वेषामेव कवीनां सोऽधिपतिः। तस्मादेव ज्येष्ठराजः
स सुष्टुतः।

+ एतद्वै गृत्समद आङ्गिरस ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽ-
न्वदत् ॥

"गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥

" देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।(ऋ० मं० २-२३-१)

"उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥
इति वै तदनुश्रुतिः ॥ (२-२३-२)

=

असावेवेन्द्रस्तपसा सुसंविदा प्रचेतनः स पुरुषः, स्वेनैव रसेन
समेन संहितानि, आत्मन्येव प्रचेतनेऽन्तर्हितानि, विश्वान्येव तानि छन्दां-
छन्दांस्यभिवर्षयति, तस्मादेव वाचा ब्रह्मणैव तेन स्वेन। मुखेन स विश्वरूपः
सम्बभूव, छन्दस एव संस्वरेण स्वसंविदा स्वयमाविर्बभूवाग्रे, सोऽ-
ग्रियो मेधाधिपतिः स शचीपतिर्वाचस्पतिः, तस्माद् विश्वेषामेव
ऋषीणां परमर्षिः समिष्टः एतद्वै यजुषा समिष्टम्–

"यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् सम्बभूव। स
मेन्द्रो मेधया स्पृणोतु ॥ इति यजुः ॥ वैश्वदेवकाण्डे - उपनिषदः।
१-४,
(अमृतस्य देव धारणो भूयासम् ॥) =

१' + ऽतावै. –
अथो ब्रह्मणस्पतिः स इन्द्रः पुरुषो ज्येष्ठः, ज्येष्ठं तत् परमं ब्रह्म
सत्यम्, विश्वस्यैवास्य जगतो बीजं सन्निदानम्। स एकर्षि विश्वविद् विश्वशक्तिः
स विश्वकर्मा, स महान् महसां महीयान् महतां श्रेष्ठः, महतीभिरेव शचीभिः
आत्मन एव चित्तिभिः, वाग्भिरेव निजाभिः शक्तिभिः संहितः, स बहिर्धा
बहुधाऽभ्युदितः, बहुभिरेव ऋषिभिर्बहुधैव संस्तुतः, छन्दसां वै स्रष्टा
उत दर्शयिता, छन्दसस्पतिः, छन्दसात्मा सोऽमृतः छन्दसैव मुखेन,
आत्मन एवामृतं रसं प्रति वर्षयति, छन्दसैवामृतत्वं गमयति, तदिन्द्रस्ये-
न्द्रत्वम् ॥

१ +

एतद्वै ऋषिरिरिम्बिठिः काण्वस्तपसाऽन्वपश्यत् ॥ तदृचा वाचाऽन्ववदत् ॥

"इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः ॥
महान् महीभिः शचीभिः ॥ इति ॥ (ऋ० ८-१६-७)

=

॥ विश्वरूप: इन्द्रः ॥

१ :+ प्रातदृवैनार्गे० —

=

स वा अयमिन्द्रः स्वयं सन्नरूपः। सन्नपात् सोऽकरणः सन्नतनूः। केवलः सन् प्रचेतनः पुरुषः। परमः सन् सोऽमृतात्मा, विश्वमेवेदं भूतं भुवनं, यच्च किञ्चैतदनुदृश्यम्। जगच्च तस्थिवच्च, यत्सचेतसं यदचेतसम् प्रथितम्। स्वेन वै स्वेन नाम्ना सरूपेणाभ्युदितं। यत्संविदितं यच्चवेद्यम्, यदसंविदितं यदसंवेद्यम्। यदिदं प्रत्यक्षं च तत्परोक्षं यत्परस्मात् परं, यदपरोक्षमान्तरं यदान्तरतमं, यद्यद्वै वाचा निरूप्यते कल्पितं यन्मनसोत कल्प्यम्, यदकल्पितं यदसंकल्प्यम्, यत् कृतं यत्कृतकं, यदकृतं यच्चाकृतकं परम्, यद्वै तत् सच्च यदसच्च, यत्सत्यं यदसत्यं च, ऋतं चानृतं च, भूतं भवच्च भाव्यं च, मूर्तं चामूर्तं च, चेतनं यदचेतनं यत् सचेतनम्, यद्वै निजं स्वं यत्परं यच्चापरम्। यद्वैतदेतद्रूपं यत्सरूपं यदरूपं, यत् सगुणं, यच्चागुणं यच्च निर्गुणम्, सर्वमेतत् स्वयं सन्निन्द्र एव रूपयति; विश्वमेवेदं पुनः नाम्ना सरूपेण प्रव्यूतः, तेन तेनैव नाम्ना सरूपेण निरूपयति, विश्वमिदं रूपं सरूपं चाभ्युदितः। स स्वयं प्रतिरूप एव भवति। सरूपः सन् स प्रतिपद्यते। वाचा च प्रति पाद्यतेऽर्थतः। इन्द्रस्यैव विश्वमेतद्रूपम्। परमस्येन्द्रस्यैव प्रतिसन्दर्शनाय प्रभवति, तस्माद् विश्वमेवेदं रूपं सरूपं सत् सुसिद्धं, एवं निदानं तमिन्द्रमेव प्रतिबोधयति, इन्द्रस्यैवैताः विश्वा एव विभूतयः, इन्द्रमेव एवं प्रतिमिमतेऽर्थतः स्वयम्। तस्मादेव मायास्ताः प्रथिताः, सत्यमाय-

सत्यः; वाच एव सद्विभूतयो मूर्तयस्ताः, तस्मादेवेन्द्रशक्तीः प्रतिसंविदते कवयस्ताः, ताभिरेवेन्द्रं पूर्णं प्रतिविन्दन्त्यर्थतः, ताभिरेव स्वमायाभिरिन्द्रः, स्वमूर्तिभिर्वै विभूतिभिरेव वाग्भिः शचीभिः शक्तिभिश्चेतनाभिः, बहुधाऽभ्युदेति नाम्ना सरूपेण प्रथते स इन्द्रः। तदिन्द्रस्येन्द्रत्वम्।

तस्य वा अस्येन्द्रस्य चितयः। चितिवृत्तयः दश शतानि ...

प्रथिताः, दश शतानि तानि सहस्रं, दश च तत्सहस्रं तदयुतम्, तदसंख्यातं तदनन्तम्, दश वा इयं सङ्ख्यांता सङ्ख्या, नवैव ताः पूर्वाः सङ्ख्याः, पूर्ण एव बिन्दुः सोऽन्तिमः, स प्रथमः सर्वाभ्यो वै सङ्ख्याभ्यः पूर्णः स विरामः, सर्वासामेव सङ्ख्यानामन्तं प्रत्यृतः, सर्वा एव सङ्ख्या प्रतितिष्ठति, तस्मादेव नवैव ताः पूर्वाः पुनः पुनः प्रति-

(परियन्ति) [~~यन्ति~~]ते सङ्ख्यया, ता एव पुनः प्रत्यावर्तन्ते, विश्वमेवेदं पुनः प्रत्यावर्तयन्त्यापरार्ध्यम्, इति वा इयमिन्द्रस्यैव सर्वा विभूति ज्येष्ठा, सा शची वागिन्द्राणी श्रेष्ठा वरीवर्ति विश्वतः तदिन्द्र एव ताभिः सह समा वरीवर्ति प्रपूर्णः, तदिन्द्रस्येन्द्रत्वम् ॥

१४ एतद्वै गर्गो भारद्वाज ऋषिस्तपसाऽन्वपश्यत् । तदृचा वाचाऽन्ववदत् ॥

"रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥"
(इति ॥ (ऋ० मं० ६-४७-१८)

=

अथो पुनर्याभिरिन्द्रः स प्रथितोऽयं जगतामीशानः । महान् महीयान् ज्येष्ठः स राजा, याभिः स पूर्णः परमः पुरुषः प्रभवति, समास्ता मायाः प्रमात्र्यः शक्तयः, ता मातरो वाग्विभूतयः, इन्द्रेणैव प्रचेतनेनात्मना सङ्गताः तस्मादेव ज्योतिषा चिताऽभ्युदिताः, नाम्ना सरूपेण विश्वत एव सन्तताः। इन्द्रमेव प्रत्यृतास्ताः संविदा कामेन कर्मणा चित्तिभिः। इन्द्रेणैव तेन स्वेन रसेन साम्ना चिता, तत्समानास्तेन ब्रह्मणाऽऽत्मना प्रभवन्ति। ब्रह्मात्मान एव ता भवन्ति।

=

+ ११८६ वे-

तस्मादन्यैरेवैतैर्भूतै रसमानास्ता इमा मायाः, ब्रह्मणः परमस्यात्मनः, इन्द्रस्यैवातिप्रतिमानाः सत्यः, विश्वास्यैवास्य प्रमात्र्यः प्रतिमानास्ता भवन्ति ॥ यद् यद् वै रूपं यदरूपं। यावद्वै रूपं यावदरूपं सत्त्वम्। यावती वै सत्ताऽस्मिन् विश्वस्मिन्निन्द्रस्य, तावदेव सत्त्वं तावत्येवास्ति सत्ता मायानां तासाम्, तस्मादुभयोरेव तयोरेतयोः सात्म्यं सरूपं भवति, मायेन्द्रयोः सममेव सर्वं सत्त्वम् । वाग् वै सा शची माया, आत्मैवेन्द्रः स पुरुषः परमस्तत्र ब्रह्मपूर्णं, तद् ब्रह्मणो ब्रह्मत्वम् । तदिन्द्रस्येन्द्रत्वम् ।

L एतद्वै विश्वकर्मर्षिस्तपसाऽन्वपश्यत् तदृचा वाचाऽन्ववदत् ।

१ "सहस्रधा पञ्चदशान्युक्था यावद् द्यावापृथिवी तावदित्तत् ॥
सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक् ॥
इति-(ऋ० मं० १०।११४।८)

तदेतन्मिथुनं पूर्णं तत्परमं पदं प्रथमं, नाम्नोतरूपेण तत्समानम्, तदमात्रमरूपं तदपात् परं, सत्यं तदक्षरं ब्रह्म, विश्वैरेव नामाभिः सरूपैरमितं तत्, स्वेनैव रूपेण प्रचेतनेन, परमे पदे स्वे व्योमनि वै परमे प्रतितिष्ठति, तस्मादपरिमितं तद् भवति, विश्वैरेव तदन्यै रसमानं, विश्वस्यैवास्य जगतस्तत्प्रतिमानम्, विश्वत एवास्मादतिरिक्तं परं पूर्णम्, तस्माद् विश्वेषामेवाप्रतिमानमेव तद् भवति, तस्य वा अस्य मिथुनस्य सत्ता, विश्वत एव वरीवर्ति नित्यम् । तदिन्द्रस्येन्द्रत्वम् ॥

एतद्वै ऋषिणा सुष्टुतम्

"यो विश्वस्य प्रतिमानं बभूव
यो अच्युतच्युत् स जनास इन्द्रः ॥ इति (ऋ० २-१२-९)

यथा वा असौ बिन्दुः, बिन्दुरिवैव दिवि द्योतते शान्त्या, सोऽमृताभिरेवात्मनः सरस्तात्मभिः, पूर्णाभिरेव कलाभिर्बिन्दुरिवैव प्रपूर्णः ।

१ + ातदवै तस्मात् परमः स इन्द्रः, परोक्ष एव सन् पुनः, आत्मनो रूपात् प्रचेतनात्, पदात् परस्मात्, उत परस्मात् स्वस्य धाम्नो न च्यवते । नैव प्रतिपद्यते, पुनः बिन्दुरिवैव सत्रणीयान् सन्निगूढोऽन्तर्हितो विश्वस्यैवेष्टे स्वयम् । तदिन्द्रस्येन्द्रत्वम् ॥

अथो पुनरस्माकं प्राणभृतां विश्वेषामेव पुरुषाणामन्तः, स सचेतनः सन्नभ्युदितः सर्वेषामपरोक्षो नित्यं सान्निहितः, सोऽयमस्माकमन्तर्हितश्चेतते, अथाप्ययं न प्रतिपद्यते, चक्षुषाऽनेन न प्रति दृश्यते, सन्दृशा पराच्या नैव संविद्यतेऽन्तः, एवमन्तर्वाचा बहुधोपसंस्तुतः, प्रतिभावितो मनसा, धीभिरनुध्यातः । प्राणैरेवानुकृतो बहिर्धा, वाचा चाग्निनैन्द्रेणैव मुखेन सोऽभिधीयतेऽखिलैः, अथाप्ययं विश्वैरेव करणैः नैव प्रतिमीयतेऽर्थतः । विश्वेषामेवान्तरतमः, सन्द्रष्टा द्रष्टृतमोऽयमन्तर्हितः, अथाप्ययं नानु दृश्यते इमा, तस्मादयममात्र एव भवति । तदिन्द्रस्येन्द्रत्वम् ॥

"अमात्रं त्वा धिषणा तित्विषे महि" इति ऋषिस्तुतिः ॥

+१ — एतद्वै प्रियमेध आङ्गिरस ऋषिस्तपसान्वपश्यत् । तदृचा
वाचाऽस्तुवत् ॥

" पुरोमात्रमृचीषममिन्द्रमुग्रं सुराधसम् ।।
ईशानं चिद्वसूनाम् ।। इति ।। (ऋ० मं० ८-६८-६)

=

इति वा अयमिन्द्रो बिन्दुरिवैव पूर्णः सन्नणीयान् । सन्नमात्रः, परमोऽणुतमः प्रचेतनः, मायाभिरेव महीभिः शचीभिः महतीभिरेव वाग्भिर्बृंहते, चित्तिभिरेव वर्धमानो विश्वाभिरेव भूतिभिः प्रथते स महीयान्, महत एवास्माद् विश्वस्माज्जगतः स महत्तमः । विश्वमेवेदमतितिष्ठति, विश्वैरेव न मीयते, परः तस्मात् सोऽतिमात्रो भवति, तदिन्द्रस्येन्द्रत्वम् । तदुपेन्द्रस्य रूपं सत्त्वम्

" परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।।
इति वै तदनुश्रुतिः (७-९९-१)

१ + / एतद्वै

इति वै सौम्येन समेनैव रसेनामृतेन प्रपूर्णः स इन्द्रः, इन्द्रेणैव पूर्णेनात्मना विश्वमिदं पूर्णम्, तस्मात् परमः स आत्मा, मायाभिरेवामृताभिः कलाभिः पूर्णः, बिन्दुरिवैवाप्रतिमानः, विश्वस्यैवास्य प्रतिमानम् । तस्माद् बिन्दुरेवेन्द्रस्य सत्प्रतीकं पूर्णम् । तदिन्द्रस्येन्द्रत्वम् । इति वै विश्वस्मात् सन् परमः स इन्द्र एव ज्यायान्, तस्मान्न परोऽस्ति कः स्वित्, तथा वा अयमिन्द्रः सन्नसमानोऽन्यैर्विश्वैः, तस्मादेव तत्समानोऽस्ति नैव कः स्वित् । स वा अयमिन्द्र एव विश्वेषामीशानः परमः स पुरुषः पूर्णः, तेनैवेदं विश्वं प्रततं पूर्णम् । तदिन्द्रस्येन्द्रत्वम् ।।

एतद्ध वामदेव ऋषिस्तपसाऽन्वपश्यत् । तदृचा वाचाऽन्ववदत् ।

" न किरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् ।।
न किरेवा यथा त्वम् ।। इति (ऋ० ४-३०-१)

" सत्यमित् तन्न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान्
(ऋ० ६-३०-४)

" न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।।
अति विश्वं ववक्षिथ " इति वै तदनुश्रुतिः ।। (ऋ० ७-३२-२३)

=

एतद्धै तनो।

स वा अयमिन्द्र एव सत्यः परमः, सत्यात्मैव स इन्द्रः प्रथमः । स भूतात्मा ब्रह्मचित्, सत्यमात्रः, स सत्यधर्मा स्वसत्त्वः सोऽमृतात्मा, सत्यकामः स सत्येक्षणः, सत्यसंवित् स सत्यकर्मा, सत्यवेदाः सत्य-

वाक्सत्त्वः। सत्येनैव स्वेन सत्यात्मना सोऽस्ति प्रपूर्णः, तस्मादेव
सत्यव्रतास्ते सत्यधर्माणः सत्यवाचः, सत्यमन्त्राः पूर्वे ऋषयः,
जीवचित्तिं स्वां कामयमानास्ते जीवनैषिणः, सत्येनैव वाचा ब्रह्मणा,
इन्द्रमेव तं सत्यं संविदते, तं सत्यमेवेन्द्रं संस्तुवन्ति, तं सत्यं
संस्तुवन्तः साक्षादेव प्रतिविन्दन्ति, वाचैव पुनः सत्यया प्रतिवेदयन्ति,
यदि वै ते सत्यं तद्यथायथमेवास्ति नित्यं स्वयम्, संविदातं धिया
संविदानाः सत्यमेव प्रतिपद्यन्ते। इन्द्रेणैव तेन संहिताः सत्यात्मान
एव ते भवन्ति ॥ अथो पुनर्यत एवेमे पुरुषाः केचिदेव तेषां
नेमे, त इमे पराग्दृशः (सन्तः।) भूतं तदिदं विश्वं (विततम्।) प्रत्यक्षमेव सुसन्दृष्टं समं
सत्यं विदन्तः, साक्षादेव प्रतिविन्दन्ति, प्रत्यक्षं तत् प्रथितं ज्योतिः
शरीरं प्रतिपद्यन्ते, एतमेव सत्यं कल्पयन्ति, सत्यमेव मनसा भावयन्ति,
तस्मात् परोक्षं तमिन्द्रं केवलं तं प्रचेतनं पूर्णं सन्तं, वस्तुतस्तम-
सन्तमेव वदन्ति, तथा वा इममात्मानं स्वमान्तरं सदान्तरतमं।
स्वमपरोक्षं सन्तं नित्यमेवानु भवन्तः, इममेव स्वं स्वमात्मान-
मेतावन्तमेव विदन्तः विश्वस्यास्य जगतः स ईशानः सन्नियन्तेन्द्रो नैव प्रभवतीति मन्यन्ते नैव सोऽस्तीति प्रतिवदन्ति।

एतद्वाक्यानु शृण्वन् पुनः कश्चिदेवमाह, परोक्षमेव सन्तं
तमिन्द्रं प्रत्यक्षमिवैव कोऽन्वपश्यत्, कोऽहतीह नरस्तमसन्त-
मुपद्रष्टुम्, असन्तं ददर्शेति वचस्तदसत्यमेव स्वयं भवति,
तथा वदन्तस्तथा विदन्तः तथा श्रद्दधानाः स्वयं साक्षादसदात्मा-
न एव ते भवन्ति, असन्तं तं वदन्तः सत्यादेव प्रच्यवन्ते।
असन्तमनु गच्छन्तः असन्तं तेऽन्ततो न प्रतिपद्यन्ते, तस्मादस्मिं-
(मनुष्याः ल्लोके, इदमेतावदेवेति सत्यं साक्षात् प्रतिपद्य विश्वं, परोक्षं
तमिन्द्रमेवाध्यक्षं विश्वस्य, नैव श्रद्दधते केचित्, तस्मात्
परमं तं देवतात्मानं ते वृथैव वाचा संस्तुवन्ति, तथा संस्तुतं सर्वं
असदेव तद् भवति।

१५ एतद्वै नेमो भार्गव ऋषिस्तपसाऽन्वपश्यत्, तद्वाचा वाचाऽन्ववदत्॥

"प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति॥
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम॥

इति। (११-८-२००३)

१ ७ ११।८।६४

अथो पुनर्यं वै तं पुरुषं सन्तं प्रति संवदन्ते स्म पृच्छया, उतामु बहुधा भावैः प्रथितैः क्लृप्तैः परीतं, उतैनं प्रतिकल्पितैरसद्भावैर्विवदन्ति, विश्वत एवास्मात् परो यः प्रतितिष्ठति । क्व ह सोऽस्तीति गम्यते तस्य सत्ता, क्वास्ति सत्या तस्य परा प्रतिष्ठा, केऽन्वेतदवगच्छन्ति, केऽनु विन्दन्ति केऽनुवदन्ति, तस्मात् परोक्षः सन् प्रचेतनः। स हि नास्तीत्येव सुयुक्तमाहुः, इति वै यमसन्तमेव तं स्वं प्रतीतं ब्रुवन्ति । यं वा असन्तमिवैव प्रतिकल्पयन्ति। स एवास्ति नित्यं सत्यः, स्वप्रतिष्ठानो विश्वस्यैवाध्यक्षः। सन्नेव प्रचेतनः स परोक्षः। विश्वमेतदधितिष्ठति, उत विश्वस्येष्टे स्वयं चिता, सर्वेषामेवान्तरोऽयमपरोक्षः स ईशानः, विश्वेषामेव करणानामान्तरतमः, विश्वासामेव धियां वाचां उत संविदां प्राणानां चेतनः, विश्वान्येव भूतानि भूतमात्राः प्राणभृतश्चेतयति, स्वेनैव रसेन पोषयति, तेजसा प्रति शोषयति, विद्युदिव वै स्वेन ज्योतिषा विश्वमुपाकर्षयति, तस्मिन्नेव प्रति मीयते विश्वम्, चेतसाऽन्तर्निमील्यते स्वयम्, परस्मिन्नेव तस्मिन् प्रतिप्रविलीयते। इति वै सोऽनु सन्धेयः। उतायं श्रद्धेयो धिया, यो वै तं हृदयेनाश्रयतेऽन्तः, उतैनं हृदय्यया समास्थया सन्धत्ते, स एवोप प्रति पद्यते तं परमं, पुरुषं स्वमात्मानं सत्यं सन्तम्, स एवेन्द्रः प्रभवतीह विश्वस्याध्यक्षः, इति वै पूर्वे ऋषयस्तपसा तं सुसन्दृशा प्रति दृश्य। छन्दसैव वाचा मुखेन विश्वेषामेव मनुष्याणां। तं परमं रसतमं सन्तम्, अमृतात्मानं तमिन्द्रमेवोपदिशन्ति, सत्यमेवाश्रावयन्ति, तस्मिन्नेव श्रद्धापयन्ति। इन्द्रस्यैव प्रति पत्त्यै। तदेषां प्राणभृतामिन्द्रस्यैवोपास्त्यै॥

१ + एतद्ध गृत्समद ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्।

"यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ॥
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥

(इति ।। (ऋ० २-१२-५)

१ उतद्धैव कामायनो...
+ अथास्मिंल्लोके य इमे पुरुषा उत योषितः, विश्वेष्वेवा २ ...षु स्वेषु समिष्टेषु। संविदा कामेन कर्मणा। वाचा मनसा प्राणैः परिवर्तमानाः, अमुष्मिन् वै लोके दिव्या देवाः ज्योतिरात्मनः, स्वेषु भावेषु दिव्येषु कर्मसु प्रणिहिताः सन्तः, विश्वेषामेव जगतां समृद्ध्यै, सदर्थेषु यतमानाः, यदा वा आत्मन् स्वमात्मानमेव श्रद्दधाना श्रद्धात्मान एव ते भवन्ति, अथो यशसैव तेऽहन्ति, उतामुष्मिन्नेवै परमे प्रचेतने स्वे पुरुषे, येषां सा श्रद्धा स्वयमभ्युदेति । पुरु...

(स्वं परमं तमेव ते श्रयन्ते, श्रद्धैव साऽस्य यशः, यशेनैव तेन श्रद्धापरेण परमं स्वमा-
त्मानं प्रति पद्यन्ते। "श्रद्धां यज्ञमारभे" इति वै तद्यजुषा समिष्टम्।
असौ वै परमा श्रद्धा। विश्वासामेव धियां परा प्रतिष्ठा, अथैषं धियां
संयमनी, उतात्मन एव सङ्गमनी, आप्यायनी सा प्राणानां, आकूतिर्या
हृदय्या सुनिर्णिक्। या प्रतीची चित्तिः सुसन्दृक्, प्रत्यग्ध्येवान्त-
रात्मनि संहिता, संविदा धिया चिताऽभ्युदिताऽन्तः, साऽऽत्मानं
सुहिते प्रयुङ्क्ते धिया, श्रद्धामेव सा प्रजनयति, श्रद्धयैव तयाऽयं
पुरुषः वस्तु विन्दते प्रति सत्यम्, यद्ध तत्सन्ततं सत्तयाऽऽत्मनः।
सर्वतः संवसति तद्ध वसु तत्सत्यं भवति।

तस्मात् पूर्वे ते ऋषयः, सत्यस्यैवोपाप्त्यै। वाचा प्राणेन
मनसा च सह संयतमानाः, सर्वस्मादेव पूर्वं पूर्वां तां पूर्वतमां
प्रतीचीं, आत्मन्येवोपसंहितामन्तः, श्रद्धामेवोपगन्तुं पराम्, श्रद्धामेवा-
भियन्ति, श्रद्धामेवाश्रयन्ते, श्रद्धयैवावृतास्ते पुनः, श्रद्धामेवोपाप्नुवन्ति।
(१०।१५१।५) "श्रद्धे श्रद्धापयेह नः" इति ऋषि स्तुतिः। इति वै पूर्वे ऋषयः
सत्यस्यैवोपाप्त्यै तां श्रद्धामुपासते, श्रद्धा वै दिव्या देवतात्मा, सर्वेषा-
मेव सम्प्रियतमा रसतमा। सत्येनैवामृतेन परमेण रसेन। स्वमात्मानं
तं परमं [illegible] संश्रयते स्वयम्।

==

तस्मादेव पूर्वे ऋषयो विश्वविदः। उत दिव्या देवाः ज्योतिरात्मानः
सन्तः, स्वंप्रतिष्ठानं तं यज्ञपतिं सन्तं। श्रद्धयैव यजमानाः। आत्मान एव
शान्त्यै। वसूनामेव समृद्ध्यै, विश्वस्यैवास्य जगतः प्रतिष्ठायै,
प्राणानां वै प्राणभृतां गुप्त्यै, प्रतिगोप्तारः। विश्वेषामेव यज्ञानां सिद्ध्यै,
प्रथमां तां यज्ञसाधनीं श्रद्धामेव परमामुपासते, श्रद्धयैवेनया पुनः
सर्वं वसु समग्रं परम्, पूर्णं वस्तु सत्यं प्रतिपद्यन्ते।

१^+ एतद्वै कामायनी ऋषिका श्रद्धा तपसाऽन्वपश्यत्। तदृचा
वाचाऽन्ववदत्॥

"श्रद्धां देवा यजमाना वायुगोपा उपासते॥
श्रद्धां हृदय्य१याऽऽकूत्या श्रद्धया विन्दते वसु॥
(शु॰ य॰ सं) इति। (ऋ० १०-१५१-४)

"श्रद्धया सत्यमाप्यते" इति वै तद्यजुषा समिष्टम्॥ तस्मात्
पूर्वे ते ऋषयः। श्रद्धयैव परमस्यात्मनः सुसंविदे [illegible]
[illegible], परमं तं सत्यं ज्योतिरात्मानमिन्द्रमेवाश्रयन्ते, सत्यमेवेन्द्रं

नित्यमुपासतेऽन्तः, इन्द्र एव सत्यः सत्यधर्मा स इन्द्रः, इन्द्रे वै पुरुषे परमे तस्मिन् सत्यं प्रतिष्ठितम्। तस्मिन्नेव सत्ये पुनरिन्द्रः स प्रतिष्ठितः, तस्मात् स सत्यधर्मा स्वयमिन्द्र एव भवति।

अथो पुनरमुष्मिन्नेव सत्यधर्मणी इन्द्रे विश्वमेतत् प्रतितिष्ठति। विश्वमेवेदं स्वयमिन्द्र एवाधितिष्ठति। तस्मादिन्द्रमेव "सत्तुवन्तीह सत्यम्, सत्यमेवेन्द्रपरम्, इन्द्रस्यैव सर्वमेतत् सत्यं रूपं भवति। तदिन्द्रस्येन्द्रत्वम्। तस्मात् पूर्वे ते ऋषयः सत्यव्रताः, तेऽनुवदन्त्यनृतं न किंस्वित्, इन्द्रं तं नानृतं वदन्ति, ऋतं वै तन्मनसाप्युद्धं, उत सत्यं वाचा, तस्मात् सत्यमेवानुवदन्तः, अनृतं नानुस्मरन्त्यन्तर्मनसा, सत्यमेव तत्पूर्णं भवति, इति वै तत्सत्यमिन्द्रस्यैव व्रतं दिव्यम्, सत्यव्रतानिमान् मर्त्यानिन्द्रमेव गमयति।

एतद्वै ऋषिणा सुष्टुतम्– सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ॥ इति (ऋ० मं० ८–६२–१२)

=

इति वै तत्सत्यं पदं परमं, विश्वेषामेव भूतानां, उत देवानां मानुषाणां, सत्यमेवायतनं तदैन्द्रम्, विश्वस्यैवास्य प्रतिष्ठा, तस्मादेव परस्मात् पुरुषादिन्द्रादृते, यच्च किञ्चात्र विद्यते यदनूद्यते, सर्वमेवैतदनृतं प्रतिपद्यते, साक्षादेवेदमचेतसं विश्वं भूतम्, ऋते प्रचेतसस्तस्माद् विश्वमेतदनृतं सम्पद्यते स्वयम्, तस्मादिन्द्रस्यैव सर्वा भूतिः। सत्यस्यैव प्रतिष्ठा "नेन्द्रादृते पवते धाम किञ्चन" इति ऋषिस्तुतिः॥ (ऋ० मं)

=

तस्मात् सर्व एवेमे पुरुषाः प्राणभृतः सन्त एवेन्द्रात्मानः विश्वे वै देवा दिव्या ज्योतिरात्मानः, आत्मन एव समृद्ध्यै। विश्वेषामेव भूतानां प्रतिष्ठित्यै, सत्यमेव तं स्वमात्मानमिन्द्रमेवाभिसंयन्ति नित्यम्, सर्वेषामेव सदर्थिनां स प्रदाता वरेण्यः, आत्मन एव शान्त्यै। उत विभूत्यै शक्त्यै स शरण्यः, तं वरेण्यं तमनुविद्यैव नन्दन्ति विश्वे, तस्य वै सत्यस्येन्द्रस्य प्रतिदानं, सद्य एव प्रतिफलितं सत्यम्, परमं सद्रसतमं स्वीयं स्वदन्ति सर्वे, मुक्त एव, तस्य चैन्द्रेणैव भावेन सत्यथैव

परस्मै प्रतिबोधयन्ति, वाच्येव सत्यायां तं परमं रसमैन्द्रमेवानुविन्द-
न्ति, रसेनैव तेन वाच्येन समेनैन्द्रेण नन्दन्ति विश्वे, अथो पुन-
रिन्द्र एव रसात्मा स्वयं। वाच एव रसेन स्वेन नन्दयतीदं विश्वम्।
तदिन्द्रस्येन्द्रत्वम् ॥ "सत्यमेनमनु विश्वे मदन्ति" इत्येतत्
"अनु यं विश्वे मदन्त्यूमाः" ॥ इति ऋषिस्तुतिः। (ऋ० १०।१२०।१)

=

1+   ऽ।ध ध्वें

स वा अयमिन्द्रः प्रचेतनः पुरुषः। परयैव स्वसत्तया
प्रभवति, आत्मन एव परमेण ज्योतिषा प्रचेतते उत चेतयति स्वमेतद्
विश्वं प्रीतः, विश्वत एवास्मात् सोऽतिरिक्तश्चेष्टते चिता, विश्वमे-
वेदं सोऽन्वितः। समेनैव रसेन प्रत्यङ्, समन्तर्हितोऽस्मास्तु प्रति
चेष्टयति स्वयं धियः, विश्वस्यैवेष्टे प्रति संशास्ति वाचा, इति वै।
स इन्द्र एवास्य प्रभवति प्रतिशासनेन स्वयम्, तदिन्द्रस्येन्द्रत्वम्।

स वा अयमिन्द्र एव परस्मात् परः पुरुषः परमः स आत्मा,
सनेवामृतः स्वस्मिन्नेवामृतत्वे नित्ये प्रतितिष्ठति, तस्मादिन्द्र
एवास्य विश्वस्य सम्प्रतिष्ठा, वाग्वै सेन्द्राणी परमा विश्वशक्तिः, सा
माता विश्वस्यास्य जगतः प्रसवित्री, सुभगेन्द्रशक्तिः। सा वाचीन्द्रा-
त्मा वैधुती चितिः, तदेतन्मिथुनं प्रथमं, विश्वस्मादेवास्मात् परमं
श्रेष्ठं तदुत्तरं, विश्वाभिरेव भूतिभिः पूर्णं, परमेणैवामृतत्वेन नित्य-
मभ्युदितं तदुत्तमं ज्योतिरभ्यावर्तं, विश्वत एवास्मात् परतः परं।
नित्यमेवावरीवर्ति सत्यम्। विश्वस्यैवास्य प्रभवति। तदिन्द्रस्येन्द्रत्वम्॥

1 +   एतद्वै ऋषिरैन्द्रो वृषाकपिस्तपसाऽन्वपश्यत्। तदृचा वाचा-
न्ववदत् ॥

"इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ॥
न ह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः॥"
इति। (ऋ० १०-८६-११)

=

तत्पत्नी अन्तरस्था

एतद्वै तदेवाद्यं सन्मिथुनं। प्रत्नतमं नित्यमन्तर्हितं गुह्यम्
विश्वेषामेव भूतानां विसृष्ट्यै, उत भूतानां प्रभूत्यै। देवानां
ज्योतिरात्मनां गुप्त्यै, आत्मन एव वाचां विभूतीनां विभूत्यै,
प्राणानां वै प्राणभृतां प्रसूत्यै, उत विश्वेषामेव भावानां मनसां धृत्यै
सत्यम् एवायं विश्वस्यास्य बीजम्। स्वीयमन्तर्गर्भे सन्निधाय

यथा वा अस्मिँल्लोके स्वं सुवीर्यं, पिता सुतायैवान्तः सन्धत्ते स्वयमात्मनि, तस्मादेव पितुः पत्युरात्मनः प्रसृतं, साक्षादेव गर्भमन्तः सन्बिभर्तीहि माता। यथा वा इयं बलाका पक्षिणी सचेतना, विद्युता ज्योतिषा प्रतिगर्जितेन, वियत्पदे विततेन, घनेन सञ्जिनवेन तदनुकूलेः, आत्मन्यन्तर्गर्भं सम्बिभर्ति, चित्तेरेव विद्युतो निनदाभ्युदितं बीजम्, तत्सचेतनं, ज्योतीरसप्रकालितम्। चित्तेरेव कलया प्रतिक्लृप्तं पुनः, कालतो लवशः पचत् स्वयम्, अण्डमेव तद् भवति।

तथा वा अम्भूरन्तरिक्षयास्ता रसवत्य आपः, उतान्तरिक्षनाम्न्यस्ता अदितयः, तमेवेन्द्रं प्रचेतनं स्वमणीयसं सन्तम्, गर्भमिवैवान्तर्दधिरे स्वयम्। तत्परमं व्योमैवादितिर्भवति। यस्मिन् वा अदितेःपदे परमे तस्मिन्, इमानि विश्वान्येव भुवनानि प्रतितिष्ठन्ति, यदैतत् परमं पदं नाभिः, अन्तरिक्षस्यैव रूपं सदभिधानम्।
"नाभ्या आसीदन्तरिक्षम्" इति ऋषिश्रुतिः (ऋ० १० - ९० - १४)

=

तस्य वा अजस्यात्मनस्तत्पदं नाभिः, विश्वेषामेव देवानां तत्प्रतिष्ठा, तस्मिन्नेव नाभिपदेऽन्तरिक्षे स्वे परमे पदे, एकं तद् वस्तु सत्यं प्रतितिष्ठति, इन्द्रस्यैव सत्त्वं तत्सत्यम्।

एतद्वै विश्वकर्मर्षिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्।

"तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे॥
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः॥
(इति. ऋ० मं० १० - ८२ - ६)

=

अथो पुनर्यस्मिन् वै पदे तस्मिन्। ब्रह्मण एवाण्डं सुहितं समग्रम्। यस्मिन् वा इमानि विश्वान्येव भुवनान्यधि हितानि, यस्मिन्नेवेन्द्रः प्रतिष्ठितः, तद्वै पुनस्त्रेधा प्रभावेन नामभी रूपैः प्रपद्यन्ते। द्याव एव तास्तिस्रो भवन्ति, उत पृथिव्यस्तिस्रः, द्यौरन्तरिक्षं भूः, भूमिरन्तरिक्षं द्यौः, द्यावा पृथिवी अन्तरिक्षं च। त्रय इमे लोकाः, भूर्भुवःस्वश्च ता व्याहृतयः, वाच एव तास्तिस्रश्छन्दस्वत्यो यजषा सामिष्टाः, आप एव ताः सारस्वत्यः, तेजस्वत्यो रसवत्यः स्वरवत्यो भवन्ति, अदितेरेव ता विभूतयः प्रतिमूर्तयः प्रयन्ते॥ एतद्वै ऋषिणा सुष्टुतम्॥
"यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः॥
(वसिष्ठः) इति- ऋ॰ मं॰ ७-१०१-४)

"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।।
इति वै तदनुश्रुतिः; ऋ० मं० १-८९-१०)

(~~तेभ्यो~~ ...)

धामो वै तिस्रस्ता ज्योतिरात्मनः सत्प्रतिष्ठानाः प्रथिता भूर्भुवः स्वः, तास्तिस्रः पृथिव्यः, इन्द्र एव ता अधितिष्ठति, परमस्य वै पुरुषस्यात्मनो मुखतः, वाचएव मुख्याया प्रमुखेन । प्रचेतनः स इन्द्र आविर्बभूवाग्नि, इन्द्रमेवान्वग्निरभ्युदियाय, उत सहैवासतुस्तौ प्रजातौ, स्वेन रसेन ज्योतिषा द्युक्षिः पृथिव्याः च "मुखादिन्द्रश्चाग्निश्च" इति वै ऋषिस्तुतिः । (ऋ० १०।९०।१३)

अथो पुनः स्वेन ज्योतिषा स्वेन रसेन समेन तौ मिथः सञ्जातौ, इन्द्राग्नी एव प्रबभूवतुः, सयुजौ तौ पुनस्तिस्र इमाः पृथिवीरधितस्थतुः । इयं वै पृथिवी प्रथमा साक्षादियमवमा, मध्यतः स्थानाभिपन्ना सा द्वितीया सा पृथिवी मध्यमा, असौ वै तृतीयोर्ध्वतना सोत्तमासौ पृथिवी परमा, ता एताः पृथिवीस्तिस्रो ज्योतिषेन्द्राग्नी सहसाधितिष्ठतो नित्यम्, विश्वस्यास्य - जगतः प्रभवतो ज्योतिरात्मानौ, एतद्ध ऋषिणा सुष्टुतम्-

"यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।।
(इति ऋ० १-१०८, ९ । कुत्सः)

त्रय इमे लोका ऊर्ध्वतानाः, अथो पुनः स्वर्भुवर्भूरधस्तानाः, इन्द्राग्न्योरेव प्रतिष्ठानास्ताः समानाः, इयं वै तदनुश्रुतिः "यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।। (इति ऋ० १-१०८, १०,) कुत्सः ।

अथो पुनस्ता इमा मातर एव तिस्रः, ज्योतिरात्मनः पुरुषास्ते त्रयोऽधिपतयः, अग्निर्वायुरादित्यश्च, आत्मनस्तास्तिस्र एव भूमीरधितिष्ठन्ति, उत मातृरेव तास्तिस्रः, द्योतमाना द्या अधितिष्ठन्ति ते त्रयः पुरुषाः पितरः, इन्द्रस्यैव परमस्य ता एताः सर्वा एव विभूतयः, विश्वत एवास्मात् परमः स इन्द्रः आत्मन एवौजसा विश्वास्ता विभूतीः सन्दधार, स एक एवाध्यक्षोऽस्य विश्वस्य प्रभवति एतद्ध ऋषिणा सुष्टुतम् ।

"तिस्रो मातॄस्त्रीन् पितॄन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति
(इति ऋ० मं० १-१६४-१०) दीर्घतमाः ।।

"तिस्रो भूमीर्धारयन् त्रीँरुत द्यून् ।। इति वै तदनुश्रुतिः ।।
(ऋ० मं० २-२७-८,) ~~कूर्मो गार्त्समदः~~ ।

तानि वा एतान्येव भुवनानि त्रीणि, उत ज्योतींषि त्रीणि ।

तेजश्चापश्च पृथिवीञ्च, वाच एव ता मातरस्तिस्रः।
ऋचो यजूंषि उत सामानि छन्दस्वत्य एव वाचस्ताः।
ज्योतींषि त्रीण्यधितिष्ठन्ति, विश्वेषामेव पुरुषाणामन्तः, त्रीणि भूतान्यनुगच्छन्ति, तिस्र एव ता धियः प्रथिताः, वाक् च प्राणश्च मनश्च, सर्विदां कर्मणां कामानां तत्प्रतिष्ठानम्। धिय एवान्तरास्वास्मिन्, एतास्वेव तानि प्रपद्यन्ते। "ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये" इति वै तद्यजुषा समिष्टम्॥ (यजुः शुक्ल)
इति वै त्रेधा प्रभावेनाभ्युदिताः, षड्ढैव प्रथितास्ताः, षड्भिरेव सत्त्वैः, इन्द्रे एव तस्मिन्नेकस्मिन् प्रतितिष्ठन्ति सर्वाः, एतद्धै ऋषिणा सुष्टुतम्—
"तिस्रो द्यावो निहिता अन्तरस्मिन् तिस्रो भूमीरुपराः षड्विधानाः॥"
इति। (ऋ० ७-८७-५)

=

एतासां वै तिसृणां द्वे विधृते सूर्येण, इमे ते उभे द्यावापृथिव्यौ, स्वेन रसेन सूर्यमुपातस्थतुः, ऊर्ध्वा चाधरा च साक्षादेवेमे भवतः, एतद्धै मिथुनं तत्प्रथमम्, इयं पृथिवी पत्नी प्रतिष्ठिता शेतेऽध्यस्तनाऽधरा, द्यौरसावभ्युदितं पतिरूर्ध्वः, उभाविमौ सङ्गतौ मिथो दम्पती इवैव प्रभवतः। "द्यौर्या भूमिः पतिर्व्योमि मिथुनं वा अतस्थतुः" इति वै तद्यजुषा समिष्टम्॥

असौ वै द्यौः प्रथमः पिता नः, यस्मादेव पुरुषात् सम्बभूवाग्रे, विश्वेषामेव भूतानां स प्रणेता, देवानां मानुषाणां च सोऽधिपतिः। तपसाऽस्माकं प्रसविता (पिता), दिव्यं रसमूर्जस्वन्तं ज्योतिषाभिवर्षयति, पृथिव्यामेवास्यां तेजसैव सरसेन स्वेन सुवीर्येण। विश्वानेवास्मान् प्राणभृतः प्रजनयति।
इयं माता पृथिवी मही महती। प्रथितेयं पृथुतराऽधस्तनेयं धात्री भूतानाम्। दिव्येनैव तेजसाऽन्नेन रसेन स्वेन विश्वानेव प्राणभृतः प्रसूते। इयं मात्री माता विश्वानेवाऽन्तर्विमिमीते एव आत्मनि, उत्ताने एवैते मिथो भवतः।
"द्यौर्वः पिता पृथिवी माता" इति ऋषिस्तुतिः (ऋ १.१९१.६)
"द्यौ३ष्पितः पृथिवि मातरध्रुक्" इति वै तदनुश्रुतिः (ऋ ६.५१.५)

=

अथो एनयोर्वै रोदस्योः पुनः, तृतीयं तत्पदं परम्। नाभिपदं तद् भुवनमन्तरिक्षम्, सदभिधानं तदनुरूपं भवति, मध्यमेव तद् पुनः, उभे एव रोदसी प्रति बबन्धामित्थोभयतः, तस्मादेवैतदेवो महायं

स बन्धुरन्तर्हितः स बन्धुरः, सन् मध्यमः सोऽनुबन्धनः, एतद्वै ऋषिणा सुष्टुतम् ॥

"द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।" इति

(ऋ० मं०-१, १६४, ३३)

"तस्य भ्राता मध्यमो अस्त्यश्नः ।" इति वै तदनुश्रुतिः,

(ऋ० मं० १, १६४, १)

तस्मिन् वै पदे मध्यमे, यो विद्युतैव स्वेन ज्योतिषाऽन्तर्हितश्चेतवेऽन्तः, स मध्यम एव सन् स्वयं पुनः, उभयोरेव पक्षयोः प्रतिसंगते द्यावापृथिव्यौ यमयति, तस्मात् स यमः, संस्तुतः सन्नेवोभयो वै लोकयोर्यन्ता प्रभवति । अथो यमस्यास्य, भुवने मध्यमे तस्मिन्, याऽन्तराण्येका राजते । द्यौस्तृतीया सा [सर्वोवर्वा/या] मध्यमा रोदस्यो रेव तयोः प्रभवति । यम एवेन्द्रः सोऽग्निर्वैद्युतः, मध्यमांतो परां धाम, परमं तद् भुवनं स्वमेवाधितिष्ठति ।

"यमो ह जातो यमो जनित्वम्" इति ऋषिस्तुतिः (ऋ० १, १६८, ६)

१+ यथा वा अस्मिंल्लोके प्रत्यक्षं यत् प्रथितम्, रथस्य वै रथचक्रस्य मध्यतोऽन्तराणिरन्तर्हिता, तस्मिन्नेवाधिपदे रथोऽयं प्रतितिष्ठति, आणीव प्रतिष्ठायां रथोऽयं वीवर्ति सहसा, एवं वै पदे मध्यमे तस्मिन्नन्तः, विश्वे वै दिव्या अमृता देवतात्मानः प्रतितिष्ठन्ति, उतेमानि विश्वान्येव भूतानि भुवनानि, उतेमे प्राणभृतः सर्वे, इति वा अयं महान् महीयान् विश्वरथोऽसौ प्रतितिष्ठति । एवं तमेनं विश्वरथं स्वकं सन्तं, इन्द्र एवाधितिष्ठति, तस्मादिन्द्र एव रथी रथेन वै तेन विश्वरूपेण प्रभवति विश्वेषामेव रथिनां स उत्तमः सन्नेव प्रथमः, "रथीतमः" सुष्टुतः,

अयं वै स इन्द्र एव रथी रथीतमः, एतद् वै-) "स रथेन रथीतमः" इति ऋषिस्तुतिः (ऋ० ६।४५।१५)

"इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।

माधुच्छन्दसो जेता ऋषि-) रथीतमं रथीनां वाजानां सत्पतिं पतिम्" इति वै तदनुश्रुतिः

स्तापसाऽन्वपश्यत्, तद् वावाचाऽभ्यवदत्,

(ऋ० १, १

+ एतद् वै हिरण्यस्तूपः -) यद्वै तत्पदं मध्यमं विश्वेषामेव देवानां सत्प्रतिष्ठानम् । गुह्यमेव तद् भवति, तस्मात् तत्पदं परमं वदन्ति । यत एव तस्मिन्नन्तरिक्षे प्रतिष्ठानेऽन्तः "क्षयतीति" प्रतियोगेन राजते तत्, तयोरेव प्रभवति, विश्वमेव प्रतिभर्तुं क्षमते, तस्मात्तदन्तरिक्षमित्याचक्षते । तदेव पदं गुह्यं तत् परमं दुर्ज्ञेयं तदविज्ञेयमेव भवति ।

इयं पृथिवी, यथाऽसौ द्यौश्च प्रथिते, ते इमे एवा

सङ्गच्छेते, अथो मध्यमं तत् सन्ध्यं परमणीयस्तदस्यम्, तस्मादेव तत्पृ-
थिवीव द्यौरिव प्रत्यक्षं न प्रतिदृश्यते बहिर्धा, तस्मात्तददृश्यमविज्ञेयं
गुह्यम्, इति वै पूर्वे ते ऋषयः, तदविज्ञेयमेव वाचा वदन्तः, उतधिया
विदन्तः, यो वै तत्पदं विजानीयात् परम्, सर्वेभ्यो वै पुरुषेभ्यः
प्रति संविदे तद्वदन्त्विति सन्दिशन्ति, नाम्ना सरूपेण निर्वक्तुं
तदर्थयन्ते, वाचा च च्छन्दसा समर्थयन्ति तदविज्ञेयं तत्पदं परम्॥

+ एतद्वै हिरण्यस्तूप आङ्गिरस ऋषिस्तपसाऽन्वपश्यत्। तदृचा
वाचाऽन्ववदत्॥

"तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट्।
आणिं न रथ्यममृताऽधितस्थुरिह ब्रवीतु य उ तच्चिकेतत्॥
(इति ऋ॰ मं॰ १, ३५, ६)

"इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः॥
(इति वै तदनुश्रुतिः, (ऋ॰ मं॰ १, १६४, ७)

(पृष्ठे)

=

एतद्वै सावित्र्यो-

अमुष्य वै ज्योतीरथस्य, उत विश्वरूपस्य भौवनस्य, ते उभे
इमे चक्रे चक्रमिवैव भ्रमतः, उभयतएवेदं क्रमेते, विश्वत एव मुखेन
ज्योतीरसं क्रामयतः, ताभ्यामेवेमं स्वं विश्वरूपं भ्रामयतः, यदमुष्मि-
न्नेव सूर्ये प्रति सङ्गते, सूर्येणैव विधृते, प्रति सन्दर्शनेनोतसत्त्वेन
संविदा धिया ब्राह्मणास्ते विदन्ति, साक्षादेव विदन्ति गतितः सदा,
अथो पुनरमुष्यैव रथस्य यद्वै तच्चक्रं तृतीयं परं गुह्यम्, ते
सत्यधर्माण एव संविदते सत्यम्, तस्मात् तत्परमं पूर्णं पदमेव
भवति, द्यावापृथिव्योरेव सन्ध्ये मध्यमं तत्प्रतितिष्ठति। + एतद्वै सा-
+ सूर्या ऋषिका तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्॥

"द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः॥ अथैकं चक्रं
गुहा तदद्धातय इद्विदुः॥ इति, (ऋ॰ मं॰ १०, ८५-१६)

=

तस्मात् तत्पदं मध्यमं, न लोको नैव भुवनं, नोवर
अनयोरेव लोकयोः सन्ध्यमेव तद् भवति॥

=

एतद्वै मेधातिथिः -
पृष्ठे वर्तते

यथा वा इयं सन्ध्या प्रथिता, साऽहोरात्रयोरेव र
न्युदेति। अनु सायमनु प्रातः। साऽहरहस्तपसाऽन्वेति वि
अहश्च रात्रिश्च, उषाश्च नक्ता च। विरूपे [illegible]

नक्तं वै कृष्णं, कृष्णायैव देवतया कालवृता रात्र्याऽधिष्ठितं। तत्
तमोऽन्धं भवति। शुक्लं तदेतदहः। शुक्लयैवोषसाऽधिष्ठितं, सत्त्वमेवा-
र्जुनं तत्प्रथितम्, उभे इमे विविक्ते मातरौ विरूपे विश्वस्यैव प्रभवतः,
विश्वेषामेव सदर्थानां सम्भृत्यै, प्रत्यहं ते प्रचरतः, स्वेन रसेन तेजसा
विश्वमेतदभिरक्षतः, एतद्वै ऋषिणा सुष्टुतम्, "अहश्च कृष्णमहरर्जुनं
च विवर्तेते रजसी वेद्याभिः" इति (ऋ॰मं॰ ६,९,१) भरद्वाजः।
"द्वे विरूपे चरतः स्वर्थे", (ऋ॰मं॰ १-९५-१) कुत्सः
नक्तोषासा वर्णमामेम्याने" (ऋ॰मं॰ १-९६, ५)
"नक्तोषासा समनसा विरूपे" (ऋ॰मं॰
"उषासानक्ता जगतामपीजुवा" (ऋ॰मं॰
इति वै तदनुश्रुतिः
असौ सन्ध्या दिव्या तेजसोत तमसा संहिता। रश्मिभिरेव
कवोष्णैः शीतैः समेनैव रसेनाभ्युदिता। साऽहोरात्रयोरन्तरा भासते
तस्मात् सा सन्ध्या मध्यमा, नाहर्न रात्रिः, नाहोरात्राभ्यामन्यत्।
नक्तोषसोरेव योगेन, अहोरात्रयोरेव वर्णाभ्यां सममभ्युदितं, अरुणे
रूपेण संहिता सा प्रत्यक्षं प्रतिदृश्यते सर्वैः। तस्मात् तन्मध्यमं प-
रूपम्, सरूपं तत् तृतीयम्।
यथा वा इयं सरित् सिता गङ्गा, असितेयं यमुना, उभे ते प्रति
संगते योगेनैव मिथः, सन्धिरेव सा सरस्वती गुह्या। तत्र वै
सन्ध्ये सरितोरन्तः, गुह्यमेव सा प्रवहतीति गम्यते सर्वैः। तस्मा
सा मध्यमा सन्धिपदा सुगुह्या सन्धिरूपैव भवतीति प्रपद्यते।
यथा वा अस्माकमन्तः। स्नेह प्राणेन बहिर्धा समुच्छ्व-
तीह नासयोः समम्, तयोरियं वामा नाडिकेडा सौम्या
दक्षिणाऽन्या पिङ्गला नाम्ना नाडिका सौरीयमशीतत-
दक्षिणयैव न सा प्रवहति। तेऽहोरात्रयोरेव सत्त्वेन स्वेन
सङ्क्रमणेन बहुधैव सञ्चरतः, एनयोरेव संधिः सा सुषुम्ना
मध्यमा सा भ्रुवोरन्तराऽभ्युदेति। तयोरेव समेनैव रसेन
प्रतीच्येव गुह्याऽन्तः प्रवहति, इयं तृतीया न वामा
नेडा न पिंगला, नोभाभ्यामितरा, उभयोरेव स-
ता सा तृतीया प्रथिताऽन्तः, एवं वा इदं मध्यमं त-
गुह्यमेव तत्पदं भवति। एतद्वै मेधातिथि ऋषि-
ख्यातु, ऋचा वाचाऽन्ववदत "इदं विष्णु

पदम्, समूळ्ह मस्य पाँसुरे" (इति-ऋ०मं १-२२-१७)
विष्णोस्तत्पदं गुह्यम्, इन्द्रस्यैव तत्प्रतिष्ठानम्, तस्मिन् वै पदे मध्यमे गुह्ये गुह्य एव सन् प्रतिष्ठित: स विष्णुः। इन्द्रेणैव स्वेन रसेन समेन सङ्गच्छते, परमेणैव योगेनाच्युतः इन्द्रस्य सखा भवति वैद्युतमेव ज्योतिषँ तद्रूपं प्रतिपद्यते, तस्मात् स उपेन्द्र इत्याचक्षते, "इन्द्रस्य युज्यः सखा" इति ऋषिस्तुतिः (ऋ० १, २२, १९.)

=

(पञ्च)

यद्वै तदिदं ब्रह्मणोऽण्डं यदरवर्णं मणुलं वृत्तं, यद्बिन्दुसत्त्वं सत्प्रतीकं, बिन्दुरिवैवास्थितं, यत्समग्रं परीतमभितो-विततं पूर्णम्, यस्मादेवात्मनः प्रसृतं, चित्तेरेव परस्याः समभ्युदितं, साक्षादेव प्रतिदृश्यते विश्वमेतत् सर्वैः। अथो पुन र्यत एवेदं प्रसूतं विश्वम्, पुरुषः स प्रचेतनः स इन्द्र एवाधितिष्ठ-त्यण्डमेतद् ब्रह्मणो बृहद् गर्भम्। स एवाधिष्ठितो विश्वमेतद्। भुवनं तदग्रे भौवनं बीजं सम्बभार। (ऋ० १०।८२।६)॥(कृ० यजुः
"तमिद्गर्भं प्रथमं दध्र आपः। य आण्डकोशे भुवनं बिभर्ति।
"अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः।
"अजस्य रूपे किमपि स्विदेकम्" इति वै तदनुश्रुतिः। (ऋ० १।१६४।६)

+ १०।९० वै नारायणः

अथो पुनस्तदेवाण्डं ब्रह्मणः। पूर्णमैन्द्रेणैवाप्लुतं ज्योतिषा सरसेन समेन, इन्द्रस्यैव तपसाऽन्ततश्चितं पाकेन तद्विभेदाद्, द्वेधैव तत्प्रतिक्लृप्तं, द्वे एव शकले ते बभूवतुः। द्यौश्च पृथिवी च प्रथिते ते इमे पुनः सञ्जग्माते, द्यावापृथिव्यौ ते बभूवतुः। समेनैव रसेन सत्स्वरूपेण नाम्ना सरूपेण [illegible] समात्मानौ ते रोदसी सम्प्राप्ते, दम्पती इवैव तौ समासतुः समौ पुरुषस्य वै परमस्य तौ पक्षौ शीर्षं च पादश्च, उभयो-र्मध्यम्, तन्मध्यमं नाभिपदं तृतीयं, इन्द्रस्यैव तत्परमं [illegible] तदन्तर्हितं परं गुह्यम्, त्रीणि वै तानि भुवनान्येव पस्पिरे

+

एतद्वै नारायणऋषिस्तत्परस्ताऽन्वपश्यत्। तदृचा वदत॥

"नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ

यन्मध्यमं नाभिपदं तत्प्रथमं, व्योमैव तत्पदं परमं, तस्मादेवाग्रे मध्यमादिन्द्राद् विद्युदात्मनः, ज्योतिर्यदभ्युदियाय, तद्यत् पृथिव्यामभ्यपतत्, अग्नेरेव रूपेण तदभिज्वलति, यद्वै तदूर्ध्वमभ्युदियाय दिवम्, असौ वै सूर्यस्यैव रूपेण दिवि तपन् रोचते बहिर्धा, विश्वस्यैवास्य जगतः। असौ मतिं प्रजनयति, इति वा इमानि त्रीणि भुवनानि, त्रय इमे ज्योतिरात्मानः पुरुषाः अग्निश्चेन्द्रश्च सूर्यश्च। तानि पदान्यधितिष्ठन्ति ॥ एतद्वै छन्दोदर्शनं भवति (अनु॰ १। सू॰ २॰ ४)

"अग्निः पृथिव्यां ज्वलति स्वरतीन्द्रस्त्वन्तरिक्षे ॥
भर्ते विश्वस्य जनिता सूर्यः प्ररोचते दिवि ॥ इति"

त्रीणि वा इमानि ज्योतींषि भवन्ति, आग्नेयमैन्द्रमादित्यं च। आग्नेयमिदं भौमं, ऐन्द्रं वै वैद्युतमन्तरिक्ष्यं, आप एवानुद्योतते भूमिमेवानुज्वलति, आदित्यं दिव्यं दिवमेवानुद्योतते। मध्यत एवेन्द्रो ज्योतिषाऽन्तर्विद्युता। आत्मनः स्वरमेवानुस्वरति, तस्मात् सोऽनुस्वार इत्याचक्षते, इति वै मध्यमः स इन्द्रो ज्योतिरात्मा, विद्युताऽनुस्वरन् पवतेऽन्तरिक्षे, सोऽन्तर्धा प्राणो विश्वेषामेव प्राणानामान्तरः प्रमुख्यः, तस्मात् प्राणं तमैन्द्रमेवाहुर्ऋषयः, प्राणादेव तस्मात् पुनरैन्द्रात्। स बहिर्धा वायुराविर्बभूव, नः सस्पर्शया मात्रया स्वया, स वायुरावाति सहसाऽन्तरिक्षे सस्वनः स्वरन् सन्ततः, स बहिर्धा प्राणो विश्वेषामेव जगतां स भूतात्मा प्रपञ्चे बहिर्धाऽभ्युदितः ॥ "मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत" इति ऋषिश्रुतिः, (ऋ॰ १०, ९०, १३)

योऽयं वै वायुरन्तरिक्षे पवते सहसा, सेन्द्रस्यैव तनूर्मध्यमा, यथा वा अयमिन्द्रो वैद्युतः। स प्रचेतनो ज्योतिष्मान् प्रथितः, अथाऽसौ स बहिर्धा दृष्टा न प्रति दृश्यते सरूपतः, तस्मादरूप एव सोऽनुभूयते, नाम्नैव भुवेन छन्दसा सस्वरेण, तथा वा अयं वायुरिन्द्रस्यैव सखा सन्नरूप एव भवति, अरूप एवामितः प्रचरति, तस्माद् गतिरेवास्य प्रतिगृह्यते। बहिर्धा त्वचा मात्रया सस्पर्शया सर्वैः, "धाजिरेकस्य ददृशे न रूपम्" इति ऋषिश्रुतिः (ऋ॰ मं॰ १६४, ४४)

अथो पुनर्वायुनाऽमुना सङ्कुलादन्तर्हिता सलि

वियन्मात्रा सा विश्वत एव संभितता, वायुनैवेरिता सा विश्वत एव
प्रचरति, सेन्द्रस्यैव वाक् परमा, वायुनैवेन्द्रस्य सख्या प्रचरति,
वायुनैवानुनीयतेऽभितः संस्वरा सा, विद्युतेव स्तनयित्नुर्नेन्द्रेण। ज्योति-
षोऽमुष्याः स्वरः स उद्घुष्यते, तस्मादमुष्य वै वायोः सन्निनदः।
स घोषः एव बहिर्धाऽनुश्रूयते सर्वैः, अथाप्यसौ वायुर्नाऽनुदृ-
श्यते, अमुष्य वै वैद्युतस्य (सतः।) जगतां बहिर्धा प्राणस्य गुह्यमेव
रूपं तद् भवति, तस्मान्नैव तत्प्रति दृश्यते नृभिः, अरूप एव स
स्वयं भवति, तस्मादमुष्य वै गतितो वायोः प्रवहतः, पदमेवानु-
मीयते तत्प्रतिष्ठानम्, नीरूप एव स प्रभवति "घोषा इदस्य
शृण्विरे न रूपम्" इति ऋषिष्टुतिः। (ऋ० मं० १०, १६८, ४)

अथाप्ययं सङ्कतो ज्योतिरात्मनेन्द्रेण सहसा पवते परीतः,
तस्मादेव सोऽनुदृश्यते गतितः संविद्यते हृदा, तस्मात् पूर्वैर्ऋषि-
भिः स वायुः सन्नरूपोऽपि पुनः सन्दृशा, दर्शतेत्येव सम्बुध्यते
छन्दसा, दर्शमेव सन्तं तमुपाह्वयन्ति। दर्शनीयमेव तं वदन्ति,
इति वै प्रत्यग् दृशस्ते ऋषयः। प्रत्यक्षमेव तं प्रतिपश्यन्ति।
"वायवा याहि दर्शत" इति ऋषिष्टुतिः (ऋ० मं० १, २, १)

अथो पुनर्वायुरयं सङ्कतः स्वेनैवेन्द्रेण। ज्योतिरात्मनाऽन्त-
र्हितो द्योततेऽन्तः। स बहिर्धा पवतेऽन्तरिक्षे सहसा, इन्द्रस्यैव
सखित्वे भावेनैव समेन प्रतिष्ठितः। इन्द्रमेवानुवर्तते स्वयम्।
तस्मात्स मरुत्सखैवेन्द्रः सुष्टुतः, अथो पुनः स इन्द्र एव स्वयं
हृदा चेतनेन। सखित्वे स्वे मरुतमेव प्रतिजग्राह सहसाऽऽत्मनि।
तस्मादयं मरुदेवेन्द्रसखाऽभवत्। इति वा इमौ, सङ्कतौ मिथः,
इन्द्रश्चैव वायुश्च, मरुदिन्द्रश्च इन्द्रवायू एव तौ द्विदैवत्यसतौ (भवतः,)
एतद्वै ऋषिणा सुष्टुतम्-
"इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये" इति (ऋ० १-[illegible])
"मरुद्भिरिन्द्र सख्यं ते अस्तु" इति ऋषिष्टुतिः (ऋ०
"मरुत्वाँ इन्द्र वृषभो रणाय" इति वै तदनुश्रुतिः॥
तस्मादेव तौ समानौ रूपेण स्वेनोत परेण संस्पृतौ मिथः।
समात्मानौ तौ सरूपौ समसत्त्वानौ। वर्चसा च समानावेव तौ [illegible]
इति वा अयं मरुत् स्वयं सन्नरूप एव पुनः। इन्द्रेण [illegible]

परमेण तेन स्वेनात्मना सङ्गतः, विद्युतेनैव ज्योतिषा प्रति द्योतते, सरूप एव स भवति, तत एव मरुद्वयं सुतेजाः सन् प्रति दृश्यते।

एतद्वै मधुच्छन्दा वैश्वामित्र ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्॥

"इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा। मन्दू समानवर्चसा॥" इति (ऋ०मं० १, ६, ७)

"सजोषा इन्द्र सगणो मरुद्भिः" इति वै तदनुश्रुतिः॥

(ऋ०मं० ३, ४७, २)

॥ इन्द्र-सखित्वम् ॥

तस्मादेवास्मिँल्लोके प्राणभृतो मनुष्याः। पूर्वे ते ऋषयः प्रत्यग्दृशः। उत पराग्दृश एते भूतदृशः, उतामुष्मिन् वै लोके देवाः परिवर्तमानाः, सत्यमेव वस्तु तत्परमं संविदानाः। उताऽन्तर्विविदिषन्तः, मनसा तद् भावयन्तः, उत कामयमानाः सन्तो धीभिस्तदुपासमानाः, तस्मिन्नेव प्रति संयतमानाः, तत्समृद्ध्यै तत्समिष्ट्यै, सत्यस्यैव तस्य प्रतिसम्पत्त्यै, उतामृतत्वस्योपाप्त्यै, परमस्यैव रसस्यानुभावाय, मरुत इवैवेन्द्रस्य सामिप्यम्, सखित्वं परं प्रतिकामयन्ते, सर्वे ते पुरुषाः स्वं स्वमेव तत् सामिप्यं प्रतिपद्यन्ते। मरुतो वै देवा दिव्याः प्राणाः। उतामी प्राणभृतो नराः, नेतारस्ते भूतानाम्, विश्वेष्वेव भूतेषु प्रति जीवन्ति, उत जीवेभ्य एवाविर्भवन्ति, उतैषां जीवानां मुखेन जीवेभ्य एव प्रजायन्ते, तस्मात्ते जीवा एव सन्तः। उत जीवसत्त्वानो भवन्तः इन्द्रमेवानुयान्ति, इन्द्रमेवोपजीवन्ति, इन्द्रमेवाजस्रं समुपासमानाः, सर्व एवेमे पुरुषाः परिजीवन्तः, विश्वेषां वै सामिप्यं तमीशानमिन्द्रमेवोपगच्छन्ति।

=

२४ + ऽतद्वैजेता० — +
पृष्ठके
है.

इन्द्र एव स ईशानः, विश्वेषामेव देवानां सोऽध्यक्षः। तेषां वै मरुन्मुखानां परमः स नेता, नराणां वै प्रणेता, विश्वस्यैवास्य जगतः प्रभवति। ये वै पुनरिमे लोकाः सर्वे ते पुरुषाः, अस्मिन्नेव लोके प्रतिष्ठित्यै, प्राणं जीवनं धनमन्नं बलं, ऊर्जं यशः, स्त्रियं पुत्रान्, प्रजाः सेनाः, गामश्वं श्रियं भूमिं, उतान्यां समग्रां तां विभूतिं, उत

शत्रूणां विजितिं, विश्वस्यैवास्य जगतः उत भयस्याभिभूतिं, अभयस्यानुभूतिं, तासामेव योगं तैतासां भोगम्, त्यागमेव तासां परितः, यद् यद् वै कामयन्ते। सर्वस्मिन्नेवार्थे तस्मिंस्तत्समृध्यै, इन्द्रस्यैव सख्यं कामयन्ते, सख्येनैव सर्वमेवतत्समृध्यते, विश्वस्मिन्नेवाभयं प्रतिपद्यते।

एतद्ध जेता माधुच्छन्दस ऋषिस्तपसाऽन्वपश्यत्। तद्वचा वाचाऽन्ववदत्॥

"सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते॥
त्वामभि प्रणोनुमो जेतारमपराजितम्॥ इति॥ (ऋ० मं० १.११.२)

विश्वेषामेव जेता स इन्द्रः। विश्वैरेवापराजितः, विश्वमेवेदं जयति। विश्वस्मिन्नेव राजते, विश्वस्यैवास्य प्रभवति।

२२ पृष्ठ में लिखकर लिखना-

॥तद्धवै मधुच्छन्दाः

तस्माद्धेव पूर्वे ते ऋषयः, सर्वेषामेव सदर्थानां समृध्यै, समिष्टानां पूर्त्यै, इन्द्रस्यैव सखित्वं कामयमानाः, विश्वस्यैवाध्यक्षं तमिन्द्रमेवाभ्यर्थयमानाः, छन्दसैव वाचा श्लक्ष्णया तत्सखित्वमेवोपाप्नुवन्, इन्द्रेणैव सङ्गतास्ते पुरुषाः, मरुत इवैव सन्तः सहसा स्वेन। विश्वेषामेव नेतारस्ते बभूवुः।

एतद्ध मधुच्छन्दा वैश्वामित्र ऋषिस्तपसाऽन्वपश्यत्। तद्वचा वाचाऽन्ववदत्॥

"तमित्सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिन्द्रो वसुदयमानः॥ इति॥ (ऋ० मं० १.१०.६)

तद्धवै श्रुतकक्षः - पृष्ठ में है,

विश्वे वा अमी दिविषदो ज्योतिरात्मनः, उत ज्योतिः सदनास्ते चित्प्रतिष्ठानाः, ज्योतिर्वदनास्ते ज्योतिर्वचनाः, ज्योतिर्नयनास्ते ज्योतिर्दर्शनाः, ज्योतिर्वसनास्ते दिव्यं ज्योतिः संवसानाः, अग्निर्वायुरादित्यश्च विश्वे वै देवास्तेजस्वन्तः पुरुषाः, इन्द्रस्यैव भूतयो विभूतयः, उतेमे पुरुषाः प्राणभृतो भूयिष्ठाः सर्व एव भूमिष्ठाः। इन्द्रस्यैव परमस्यात्मनो भूतयः, इन्द्रेणैव तेन प्रचेतनेन स्वेनैवात्मना प्रतिसंगसन्तः, इन्द्रात्मान एवेमे भवन्ति, तस्मात् सर्व एव वयमिमे प्राणभृतः। इन्द्रस्यैव तस्य स्वीयाः समानाः सखायः, अमीषां पुनरस्माकं। स इन्द्र एव स्वीयः परमोऽस्ति सत्यः, तस्मादिमे पुरुषा इन्द्रमाश्रयमाणाः, इन्द्रस्यैव चिता वाचा, सर्वेष्वेवार्थे-

प्रभवन्ति। अथो पुनः स्वात्मानं वै प्रति संस्पर्धमानान् अन्यान्
पुरुषाँस्तानसुर्यान् असदर्थान् दुरुदितान् वाननिन्द्रानननीशान्
प्रति वक्तुं क्षमन्ते, दुरिष्टाँस्तान् स्पर्धयितुं प्रति प्रभवन्ति ॥
इन्द्रस्यैव त आत्मीयाः सन्तः, इन्द्रात्मान एवते भवन्ति ॥

+ २४ पृष्ठे लिखतः

एतद्वै श्रुतकक्ष आङ्गिरस ऋषिस्तपसाऽन्वपश्यत्। तदृचा
वाचाऽन्ववदत् ॥
"त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः। त्वमस्माकं तव
स्मसि ॥ इति ॥ (ऋ० मं० ८, ९२, ३२)

इति वा एतेषु वै पुरुषेषु मनुष्येषुत देवेषु। इन्द्रमेव तं
सत्यं स्वमात्मानं सन्तं, विश्वस्यैवास्य जगतोऽध्यक्षं। यः संविदा
श्रद्धत्तेऽन्तरात्मनि। इन्द्रस्यैव सरवासन्। विश्वमेतद् विजयते।

+

अथो पुनः स्वमिमं पुरुषं श्रद्दधानं सन्तं। इन्द्र एव पिता
प्रति श्रद्धत्ते हृदा, पुत्रमिमैव प्रियं भावयति, परोक्ष एवेन्द्रः स
ईशानः प्रचेतनः, प्राणभृद्देवायं जीव आन्तरोऽयमपरोक्षः
सचेतनः, यदा वा उभाविमौ तौ समानौ, प्रिययैव धिया
संगच्छेते। समेनैव रसेन संयुज्येते, मिथ एवेन्द्रात्मानौ तौ प्रति
भावयतः। विश्वास्मिन्नेवार्थे स्वेन सवीर्येण सहैव प्रभवतः, तेन
योगेनैव समृद्धं तत्सारिवत्वम्, शत्रूयन्तो नाक्रमन्ते। नोत बाधयन्ते
केचन। इन्द्रस्यैव प्रभावाय, इन्द्रस्यैव सख्येन तेनामृतत्वेन।
इन्द्रायैव सौम्यः परमो रसः सोऽनुभवति, विश्वत एव समुद्रवति,
तस्मादेवेन्द्रस्य तत्सखित्वं भद्रं, भद्रमेव तत्प्रतिदानम् ॥

+

एतद्वै प्रगाथ ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत् ॥
"अहं च त्वं च वृत्रहन् सं युज्याव सनिभ्य आ ॥
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥
(इति। (ऋ० मं० ८।६२।११) (~~इन्द्रवायू~~ ॥

॥ इन्द्रवायू ॥ —

+ तद् वैनयु ... २५ पृष्ठे

इति वै पुरुषः स इन्द्रः परमः स आत्मा, मुख्य एवायं प्राणः स
आन्तरः, विश्वेषामेव चेततेऽन्तः, ऐन्द्रः सचेतनः पुरुषः। वायुरयं बहिर्धा
प्राणः प्रथितः। सहसा वहन् परिचेततेऽरिक्षे। उभाविमौ बहिर्धोऽन्तश्च
च सञ्चरन्तौ सङ्गमाते मिथः; इन्द्रवायू तौ सन्तौ सरवायौ, समानं
एवं मध्यममन्तरिक्षमधितिष्ठतः, ऐन्द्रवायवमेव तत्सख्यम्।
इन्द्रोऽयं मध्यमो ज्योतिरात्मा। विद्युता राजतेऽन्तः, वायुरयं
मारुतः सहसा पवते, उभाविमौ सख्येनैव चेतेते मिथः ...

च्चेतयतः, इन्द्र आत्मा मुख्य एवायं प्राणः, मुखेनैव वाचा विश्वेषा-
मन्तः, विश्वा एव वाचोऽनुस्वरति, तस्मादेवैन्द्रः स भवति। वायुरयं
प्राणो नासिक्यः, बिन्दुमयीं वाचमेवानुस्वरन्नतति द्वारा नसः;
तस्माद्वागेवै सैन्द्री वैद्युती मध्यमा सेन्द्राणी, इन्द्रसत्त्वा वागियमे-
न्द्रेणेव ज्योतिषाऽऽस्ता, इन्द्रीऽयं वाचा मध्यमया सन्निनदो
रोचते, तस्मादिमौ तौ प्राणसत्त्वौ समानौ समानायनौ समायतनौ
भवतः॥

विश्वेषामेव देवानां करणानां। सद्रसौ तौ रसभृतौ विश्वमेव
यज्ञं बिभ्रतः, संविदा चिता क्रियया सह वाचा संवसतः, सख्येनैव
च्चेतेते मिथः, विश्वमेवेदं सहसा स्वेन प्रति च्चेतयतः। एतद्ध
संहितं तदैन्द्र वायवमेव ग्रहं निजम्। वाचा चैन्द्र्या प्राणेन
वायव्येन प्रतिकल्पयतः; तस्मादैन्द्रा मारुतमेव तद्रूपं यज्ञे सोम-
सवने प्रशस्यते।

ऋग्वेद मे एतद्ध मधुच्छन्दा वैश्वामित्र स्तपसाऽन्वपश्यत्। तदृचा वाचाऽ-
न्ववदत्॥

"वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू॥
तावायातमुप द्रवत्॥ इति (ऋ० मं० १, २, ५)
"इन्द्रवायू इमे सुता उप प्रयोभिरागतम्॥ इति वै तदनुश्रुतिः॥
(ऋ० मं० १, २, ४)

=

(इन्द्राग्नी)

=

अथो पुनः पुरुषः स परमः, यज्ञो यज्ञोधिपतिः, विश्वेषामेव
यज्ञानां समृद्ध्यै, आत्मन एव भूत्यै, दिव्यानि वा अङ्गानि
चित्तिसत्त्वानि सम्बभार, अङ्गैरेव स सत्त्वैः पुनः, संविदां कामानां
कर्मणां च्चितिभिः, विश्वानेव देवान् चित्सत्त्वन उत्ससर्ज, आत्मनो
यन्मुखं दिव्यं सोऽग्न एवाद उदाकरोत्। मुखादेव तस्मात्
संविच्चितिराविर्बभूव, सन्निनदा, वागेव सा बभौ ज्योतिरात्मा
सस्वरा, वाच एव मुख्यायास्तस्याः। पुनरिन्द्र एवाविरासाग्ने।
अचेतनः स समुच्छ्वसन्, इन्द्रेण वै तेन सहैवाग्निराविर्बभूव
तस्मादेवेमौ मुख्यौ सन्तौ, विश्वेषामेव देवानां प्रमुख्यौ प्रथमौ।
(वाचैव स्वया प्रमुख्यया प्रतिसम्भृतौ।

"मुखादिन्द्रश्चाग्निश्च" इति ऋषिश्रुतिः, (ऋ० मं० १०, ९०, १४)

उभौ तौ सहैव सङ्गमाते मिथः, समानायतनौ ज्योतिरात्मानौ सन्तौ, समेनैव तेन योगेन स्वं यशमनु तस्थतुः। इन्द्रोऽयं मध्यमो वै वैद्युतः, अग्निरयं भौमः, इति वा उभौ ज्योतिरात्मानौ (भवतः), यद्वैतद्वैद्युतं ज्योतिः सन्निनदं सदभिज्वलत्, यदाऽस्यां पृथिव्यां पततीह सहसा, साक्षादेवाग्निः स भवति, तस्मादेव वैद्युतो ज्योतिरात्मा स इन्द्रः एव भौमोऽग्निरयं प्रथते, भौममेव काष्ठमुताङ्गारं तदनुज्वलति, तस्मादिन्द्र एवाग्निः सोऽग्निरेवेन्द्रः, इन्द्राग्नी एव तौ भवतः, तदैन्द्राग्नं द्विदैवत्यं सरूपं ज्योतिषं सत्त्वम्,

इन्द्रोऽयं प्रचेतन आत्मा प्रत्यङ् प्रतितिष्ठति, अग्निरयं वैश्वनरः, उभौ तौ सयुजौ समौ समानायतनौ भवतः,

अथो पुन र्वाक् सत्त्वोऽयमिन्द्रो वाच्यो वाचस्पतिः, वागियमैन्द्री ज्योतिष्मती प्रचेतना, अग्निर्वै वैश्वानरः, इति वै वागग्नी तौ समानौ समुखौ मुख्यौ, वाग्-वैश्वानरौ सचेतनौ मिथ एव योगेन प्रभवतः,

वाक्-प्राणयोरेव स्वरूपं सत्त्वं तद् भवति,

वागैन्द्री सोऽग्निरेव प्राणः, संवित्क्रियात्मानौ तौ भवतः,

प्राणः स ऐन्द्रो विश्वेषामेवाङ्गानां परः। विश्वान्येवाङ्गान्यधितिष्ठति, प्राणं तमैन्द्रमेव तानि प्रचेतसाऽनुवर्तन्ते, "ऐन्द्रः प्राणो अङ्गे अङ्गे नि दीध्यत्"

इति वै तद्यजुषा समिष्टम्, अग्निरेव वागियं ज्योतिष्मती। वागग्नायी सती साऽऽग्नेयी, वाच्यः सोऽग्निः सस्वनः, प्राणेनैव सहैन्द्रेण मुखेन वाणियमुच्चरति, इति वै वाचैव सहाग्नेय्या संहितः स ऐन्द्रः प्राणः प्रमुख्यः, स इन्द्र एव स्वेन मुखेन वाचा सर्वमिव संविदं प्रतिबोधयति,

इति वा इमौ ज्योतिरात्मानौ नित्यमेवानुप्रावृतौ मिथः, त्रिषु लोकेषु प्रति तस्थतुः, एवद्वै ऋषिणा सुष्टुतम्।

"यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः"

इति (ऋ० मं० १।१०८।९)

तौ बहिर्धाऽन्तर्धा च समानायतनौ समानायनौ भवतः। तस्य वा अस्य पुरुषस्य तिस्र इमा अर्पिता स्तन्वः, आत्मन एव प्रतिष्ठानाः, तिस्रस्ता आन्तरास्थानास्ता अवमस्या: इयं वै स्थविष्ठा

तनूः, जागर्तीह चेतते बहिर्धा प्राणैः, वृत्तिभिरेवोन्मुखा ऽभिवर्तते ऽन्ततः, मध्यमा सा तनूरान्तरा। मनः सत्त्वा ऽन्तः स्वपितीत्येव प्रतीयते सर्वैः, तैजसी सा स्वप्नसत्त्वा ऽभिधीयते, सा ऽनुभूयते ऽन्तः, परमा सा ऽन्तरतमा सुषुप्तिसत्त्वा। रसतमा ऽन्तः प्रज्ञात्मा सम्प्रसादसत्वा, तस्मादेव नावबुध्यते सर्वैः, इति वै तिस्र इमास्तनूः इमाविन्द्राग्नी सह स्वेनैव ज्योतिषा चेतसा ऽधितस्थतुः, विश्वमेवेदं स्वं शरीरं प्रतिष्ठापयतः तदैन्द्राग्नं सत्त्वं भवति

=

इति वा अयमिन्द्रः स एक एव सन् पुनः, मरुद्भिरिवैव वायुना ऽग्निना। बहुधा ऽभ्युदितैरन्यैः दिव्यैर्देवतैः ससत्त्वैः समैः। सन् सयुक् स द्विदैवत्यसत्त्वः। विश्वैरेव देवैः सह सम्भ्रजते, विश्वे वै त इमे देवाः ससत्त्वानो ज्योतिरात्मानः, अग्निर्वायुरादित्यश्च सोमश्च, वरुणः पूषा च विष्णुश्च, बृहस्पतिर्ब्रह्मणस्पतिश्च, पर्वतः पर्जन्यश्च ऋभवश्च, इन्द्रेण सहैतैः समृद्धं सर्वं तद्द्विदैवत्यं सत्त्वम् ॥

=

॥ इन्द्रासोमौ ॥

एषो पुनः पुरुषे तस्मिन् वै परमे, यद्वैतन्मनसो बीजं ससुवीर्यमन्तर्हितं समास कामसत्त्वम्, ततएवाग्रे सम्बभूव मन एवान्तरं तत्करणं परम्, तस्मादेव मनसः सञ्जज्ञे सोमः, असौ रसो रसतमो, मन एवाधितिष्ठति,

"चन्द्रमा मनसो जातः ॥ (ऋ० १०, ९०, १४)

मनश्चिन्मनसस्पतिः" इति ऋषिश्रुतिः "ऋ०मं० ९,)

तद्वै ... २६ पृष्ठ में है

तस्य वै पुरुषस्य पुनः, मुखादेव वाक् सत्त्वतश्चितः, प्रतिसञ्जज्ञे य इन्द्रः, उताग्निश्च मिथः, उभौ तौ सञ्जग्माते स्वेनान्तरेण सोमेन, स्वेनैव ज्योतिषा संस्वरेण, परेण वै रसेन प्रत्यृतौ तौ। इन्द्रासोमावेव भवतः, तथा ऽग्नीषोमौ, इन्द्रो ऽयं मध्यमो ज्योतिरात्मा वैद्युतः, सोमो ऽसौ दिव्यो रसात्मा स उत्तमः, ता विमौ देवतात्मानौ स्वेनैव ~~सोमे~~ स्वेन ज्योतिषोत रसेन, एतेषु वै विश्वेष्वेव पुरुषेषु, प्रतिजीवनायोत संविदे, स्वां प्राणस्य चितिं ~~[illegible]~~ मनसः सत्त्वं च प्रतिसन्दधाते, विश्वान्येव भेषजानि बिभ्रतः। विश्वमेवेदमभिरक्षतः

अस्मासु यदर्हितं दुरितं, यच्च किञ्च किल्बिषं सर्वमेवापयापयतः स्वीयमेव सत्त्वं प्रतिदीपयतः ॥

+२८ पृष्ठ में लिखना।

एतद्वै तपसान्वपश्यत् तदृचा वाचान्ववदत्।

"इन्द्रासोमा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ॥ अवस्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ (इति) (ऋ॰मं॰)

=

अथो पुनरिन्द्र एवाय मात्मा प्रचेतनः, सोमो वै मनः स मनस्वी मनसोऽधिपतिः, उभयं तत्सहितः सङ्गतं मिथः, विश्वमेवेद मन्वातस्थतुः,

इन्द्रो वै प्राणः स प्रमुख्यो मनः सोमः तस्मादयं प्राणः स ऐन्द्रः सौम्यं तन्मन एवान्वेति, उतादो मनः सौम्यं प्राणमेवैन्द्रं हृदयेनान्वेति, तस्मादिमौ ज्योती रसात्मानौ सन्तौ विश्वेष्वेवान्तः पुरुषेषु प्राणेनैव मनसा स्वेन सत्त्वेन प्रतितिष्ठतः।

कर्मणोत भावेन स्वेन सत्त्वेन स्वेन विश्वानेवेमान् प्राणभृतः प्रतिचेतयतः, इन्द्रासोमयो रेव सत्त्वं तद् भवति।

ऐन्द्री वागियं ज्योतिष्मती प्रचेतना, सोम एव तन्मनः सत्त्वः। वाङ्मनसे एव तौ भवतः, इन्द्रश्च सोमश्च तावुभौ सङ्गतौ, विश्वेष्वेव पुरुषेष्वन्तः, वाङ्मनसे एव प्रति भावयतः,

इति वा अयमिन्द्रो वाक् सत्त्वः सस्वनः सस्वरा वागिन्द्रसत्त्वा सैन्द्री, मनसस्पतिना सोमेन। सौम्येनैव मानसेन संहिता, विश्वेष्वेव पुरुषेष्वन्तः प्रति तिष्ठति, तस्मादेव वाचस्पतिः स सोमो मानसो मनोयुक् स मनोजुवः सुष्टुतः, एतद्वै ऋषिणा सुष्टुतम् ॥

"वाचस्पतिं विश्वकर्माण मूतये मनोजुवं वाजे अद्या हुवेम ॥ इति। (ऋ॰मं॰ १०, ८१, ७)

(अग्नी षोमौ)

अयमग्निरवमो भौमः, वैद्युतो मध्यमः स इन्द्रः। ज्योतिषः पुरुषः सोष्णरश्मिः। सोमोऽसौ रसो दिव्यो रसात्मा स उत्तमः, असौ मानसो मनसस्पतिः स शीतरश्मिः, इति वै ज्योतीरसात्मानौ तौ भवतः ॥

अथायं सोऽग्निरेव वाग् भवत्यान्तरः, वाक् सत्त्वोऽयं वाङ्मुखः, सोमोऽन्तर्मनः सत्त्वो मनस्वान्, वाङ्मानसे एव तौ भवतः, अग्नीषोमयोरेव तद् द्विदैवत्यं सत्त्वम्, "अग्नीषोमा सवेदसा" इति ऋषिष्टुतिः ॥ (ऋ० मं० १।९३।९)

सूर्याचन्द्रमसोरेवरूपे सत्त्वम्, तत्समानम्, उभौ तावमू ज्योतीरसात्मानौ, तावुत्तमौ हृङ्मनः सत्त्वौ भवतः। मित्रावरुणयोरेव तत्स्वरूपम्,
उषसाऽसौ मित्रः स तेजस्वी, चाक्षुषः पुरुषः, रात्र्याऽसौ वरुणः सरस्वान्, असावेव मनस्वान्, मैत्रावरुणमेवतत् सत्त्वम्, ब्राह्मतेजाः स मित्रः, क्षत्रौजाः स वरुणः, तस्मादेव क्रतु-दक्षौ तौ मित्रावरुणौ भवतः, क्रतुर्वै मित्रः सन्दृशा संविदा धिया, ब्राह्मेणैव तेजसाऽभ्युदेति, दक्षो वा असौ वरुणोऽद्भिः प्रणेनैव कर्मणा, क्षत्रेणैवोजसा सहसाऽभ्युदेति, इति वा इमौ सङ्गतौ मिथः विश्वमेतत् प्रतिवर्तयतः, विश्वमेवेदमनुवर्तेते, विश्वान्येव दुरितानि दुष्क्रमणानि प्रतितारयतः,

एतद्वै नाभाकः काण्व ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाच्याऽन्ववदत् ॥

"इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ॥
ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥"
(इति ॥ (ऋ मं० ८।४२।३)

अथो पुनरयमिन्द्रोऽस्मिन् पुरुषेऽन्तः। आत्मन एवाधापदं मूलमेव, ज्योतिषाऽधितिष्ठति प्रचेतनः, वैश्वानरोऽयमग्निरवमः, इन्द्रोऽयं हृदय्यः सोमोऽसौ दिव्यो मूर्धन्यः। सोऽमृतात्मा स उत्तमः, अमृतेनैव स्वेन रसेन संहितः मूर्धानं स्वं पदमेवाधितिष्ठति, शीर्षण्यं स्वमुत्तमं मनः सत्त्वं, सौम्यं रसमेवाभिवर्षयति, प्राणमेवेन्द्रं स्वमात्मानम्, सौम्येनैव स्वेन रसेन प्याययति।
अयमिन्द्रः पुनरन्तरात्मन्यन्तर्हितः। विद्युतेव मुखेन प्रचेतसा। प्रतीच्या पथा स्वममृतं सद्रसं समुन्नयति। मूर्धन्येवान्तः प्रतिष्ठापयति, ज्योतिषैव स्वेन सौम्यं मनः सत्त्वं समीरयति, वारुणीस्ता आपः शीर्षण्याः सरसाः पुनः, मूर्ध्नि एव प्रच्युताः (स्यया रसनया प्रपिबति।

एतद्वै सोमसवनम्, इन्द्रस्यैवात्मनस्तत्परमस्य। तत्सोमपान-मेव सम्पद्यते स्वयम्, तस्मादिन्द्रायैवात्मने तत् स्वयं परिस्रवति, अमृतत्वमेवास्मिन् प्रतिष्ठापयति, "इन्द्रायेन्दो परिस्रव" इति ऋषिष्टुतिः॥ (ऋ० मं०९, ११२।१)

प्रातर्द्वै कश्यपो० —

य एवं विद्वान् परमेण वै योगेन दिव्येन, मूर्धन्यमेव सोमं संविदाऽजस्रं पिबति, सोमेनैव तेन स्वमात्मानं तमिन्द्रमेव प्रति-तर्पयति, सोऽमृतात्मैव स्वयं प्रभवति॥

सोऽमृतत्वे पदे धामे स्वयं प्रतितिष्ठति, सम्राजतेऽयमिन्द्रेण ज्योति-रात्मना, प्रतिनन्दते स्वयम्, विश्वानेव प्राणभृतः सोऽभिनन्दयति, इन्द्रासोमयोरेव तद् द्विदैवत्यं सत्त्वंसन्महत्त्वम्।

वाग् वै सेयमैन्द्री सौम्येनैव तेन, स्वेन रसेन समेन स्वयं तृप्यति, इन्द्रं स्वमात्मानं तर्पयति, तस्मादेवास्मिन् वै यज्ञे सौम्ये, सोमं रसं पिबन्तः "वाग्देवी सोमस्य तृप्यत्वित्येवानुमन्त्रयन्ते, असौ वै सोमः स्वेन रसेनैव समेन, स्वां सतीमिवैव वाचमैन्द्रीं तर्पयति, वाग् वै सा प्रतृप्ता यथा सती पतिं, स्वेन रसेन समेन, परमं तमिन्द्रमात्मानं प्रति-तर्पयति, इन्द्रायैव तस्मै स्वस्मै, परस्मै पुरुषायात्मने ब्रह्मणे, स्वं रसं तं रसात्मानं समर्पयति, सोमेनैव तेन रसेन प्रतिनन्दयति, तत एव प्रतिनन्दते स्वयम्। इन्द्रासोमयोरेव प्रपूर्णं सत्यं, तदमृतत्वं परं, सन्महत्त्वं द्विदैवत्यं सत्त्वम्॥

=

एतद्वै कश्यपो मारीच ऋषिस्तपसाऽन्वपश्यत्, तदृचा वाचाऽ-न्ववदत्॥

"यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते॥
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव॥
इति (ऋ०मं० ९.११३।११)

=

अपाम सोममममृता अभूमागन्म ज्योतिरविदाम देवान्॥ इति वै तदनुश्रुतिः॥ (ऋ०मं० ८।४८।३)

=

॥ इन्द्रावरुणौ ॥

इन्द्रावरुणयोरेव रूपं तत् सतत्त्वम्, इन्द्रो वै मध्यमो वैद्युतो

द्विरभ्युदितः, ज्योतिरात्मा प्राणसत्त्वः सचेतनः, वरुणोऽसौ दिव्यः स उत्तमः सरस्वान्, सन्नपांपतिः, उत सौम्यः सरसः स मनस्वान्, उभावमू सङ्कृतौ ज्योतीरसात्मानौ, सम्राजौ क्षत्रौजसौ सन्तौ, विश्वेषामेव जगतां प्रभवतः, तस्मादुभौ तौ प्राणसत्त्वौ समानौ, समानेनैव योगेन रसेनैव समेन। विश्वमेवेदं प्रणयतः। विश्वं स्वमभिरक्षतः।

"इन्द्रो यातोऽवसितस्य राजा" (ऋ० मं० १.३२;१५)

"अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः।
(ऋ० मं० १, २४, ७)

"इन्द्रावरुणयोरहं सम्राजोरव आवृणे। तानो मृळात ईदृशे ॥
इति वै तदनुश्रुतिः ॥ (ऋ० मं० १-१७-१)

=

एतद्वै सुपर्णः-

इन्द्रो वा अयमात्मा हृदय्यः, प्रचेतनः, वरुणोऽसौ शीर्षण्यः स सोमः। सौम्येनैव वारुणेन स्वेन रसेन मनसा स प्रचेताः, वारुणमेव रसं स्वं चेतसा प्रवर्षयति, वारुणेनैव तेन रसेन विश्वमेवेदं सशरीरं हृदय्यमिन्द्रं, उतैन्द्रमेवेमं प्राणं प्रति चेतयति, तस्मादेव योगेनेन्द्रेण स्वेनात्मना, ऐन्द्र्या सह वाचा च सरस्वत्या। रसनयाऽन्तरूर्ध्वं वारुणं तं स्वमेवामृतं रसं दिव्यम्, यः सचेतसा पिबति, प्राणं स्वं रसेनैन्द्रमाप्याययति, इन्द्रावरुणयोरेव सत्त्वं भजते, क्षात्रमेव तदोजः प्रतिपद्यते, एतद्वै तदैन्द्रा वारुणं द्विदैवत्यं सत्त्वम्॥

एतद्वै सुपर्ण ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्।
"इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम्।
प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्रतिरतं न आयुः॥
इति। (ऋ० मं० ८, ५९, ७)

॥ इन्द्रापूषणौ ॥

तद्वै

इन्द्रो वा अयं मध्यमो वैद्युतः, असौ पूषा सरस्वान् सूर्यः। स्वेनैव रसेन विश्वानेव प्राणभृतः पोषयति, विश्वमेवेदं प्रति पुष्णाति तेजसा, उभावेव तौ ज्योतीरसात्मानौ भवतः, इन्द्रापूष्णोरेव सत्त्वमेतत्। विश्वेषामेव प्रियं भवति। स्वेनैव सत्त्वेन तेनैतौ विश्वमेतत् समर्धयतः; तस्मादेव पूर्वे ऋषयः तयोरेव सख्यमभीप्सन्तः। विश्वेषामेव प्रतिजीवनाय, उतान्तःस्य सरस्यैवोपाप्त्यै, विश्वत एव स्वस्तये, तौ दिव्यौ देवतात्मानावभ्यर्थयन्ते ॥

एतद्वै ऋषिर्भरद्वाजस्तपसाऽन्वपश्यत्॥ तदृचा वाचाऽन्ववदत्॥

"इन्द्रानुपूषणा वयं सख्याय स्वस्तये। हुवेम वाजसातये ॥
(इति - ऋ॰ मं॰ ६, ६७, १)

"इन्द्रः सुपूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुहे।
ऋ॰ ३, ५७, २

"इन्द्रापूष्णोः प्रियमप्येति पाथः ॥ इतिनैतदनुश्रुतिः

० एतद्वै मेधातिथिः)

॥ इन्द्राविष्णू ॥

इन्द्रोऽयं मध्यमो वैद्युतोऽन्तरिक्षेऽन्तर्हितश्चेततेऽन्तः, विष्णुरसौ वै दिव्यः सविता दिविद्योतते, स उत्तमः तेजसा स्वेन सत्त्वेन, भुवनेष्वेषु त्रीणि पदानि सन्निदधेऽन्तः, तस्मात् स त्रिविक्रमः प्रथितः, तत्र वै पदे मध्यमेऽन्तरिक्षे, गुह्यमेव तत्पदमन्तर्हितं परम्, तस्मादेव तत्समूढमित्याचक्षते। तस्मिन्वै पदे स्वे मध्यमेऽन्तरिक्षे, इन्द्रश्च विष्णुश्च सञ्जग्माते मिथः, गुह्येनैव सत्त्वेन समानौ, तस्मादेव तौ सखायौ मिथः प्रभवतः, नाम्ना सरूपेण, समेन धाम्ना सधर्मणा वै स्वेन सत्त्वेन, समेनैव कर्मणा स्वेन विश्वेषामेव जगतामीशाते समम्। उभौ तौ सयुजौ समानौ। सत्त्वेनैव रसेन विश्वानेवेमान् प्राणभृतः प्रति प्रहर्षयतः, विश्वमेवेदमभिरक्षतः, ऐन्द्रावैष्णवमेव तद् द्विदैवत्यं सत्त्वम्।

एतद्वै मेधातिथिर्ऋषिस्तपसाऽन्वपश्यत्। तदृचावाच्याऽन्ववदत् ॥

"विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥ इति। (ऋ॰ १. २२, १९)

"इन्द्राविष्णू मदपती मदानाम्" इति ऋषिस्तुतिः,
(ऋ॰ मं॰ ६। ६९। ३)

=

अथो यत एवासौ विष्णुः स्वेनैव रसेन परमेण वै सम्प्रियेण, इन्द्रेणैव सञ्जग्मे स्वयम्, तस्मात् स उपेन्द्र इत्याचक्षते, इन्द्रोपेन्द्रौ तौ समानौ नाम्ना सरूपेण धाम्ना।

सत्त्वेनैव समेन सुवीर्येण प्रभवतः,

यद् वै तद् वैद्युतं ज्योतिरैन्द्रं, दिव्यं ज्योतिस्तदादित्यमोपेन्द्रं च सङ्गते, ते उभे समेन ज्योतिषा रसेन सहाद्रिश्च मिथः। तस्मादेव स इन्द्रः स सूर्ये त्येव सम्बुध्यते।

एतद्वै सुकक्ष आङ्गिरस ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्।

"यदद्य कच्च वृत्रहन् उदगा अभि सूर्य ॥
सर्वं तदिन्द्र ते वशे, ॥ इति (ऋ॰ मं॰ ८, ९३, ४)

=

तद्वैभरद्वाजः

इति वै तावुभा विभौ पुरुषौ स्वसत्त्वानौ सन्तौ, स्वेनैव सहसा विश्वमेतद् विजिग्यथुः समम्, विश्वेषामेव जगतां बभूवतुस्तावधिपती, तस्मादेवापराजितौ तौ प्रबभूवतुः, उभौ तौ समानौ सहसा वर्चसा महसा। विश्वाभिरेव भूतिभिः ससुवीर्येण। स्वेन सत्त्वेन। तस्मादेवैनयोः पुनः न कश्चन परा जीयते मिथः, इति वा उभौ सङ्गतौ तौ सखायौ सहैव प्रतिविक्रमणेन, विश्वमेवेदं प्रति प्रपाये मिथः, तथा वै समेनैव स्वेन भावेन, ~~स्वेन~~ महसा स्वेन त्रिविक्रमणौ सन्तौ, एतेषु वै भुवनेषु त्रिषु ज्योतिषा स्वेन त्रिधा, विश्वत एव संस्पृतौ पूर्णौ, भूतिभिर्वै सहस्रशः विश्वमेतद्वितन्वाते स्वयम्, सुवीर्येण स्वेन ससत्त्वेन विश्वमेतद् विजयेते समम्,

तस्मादेवान्यस्ताभ्यां परः, नैव बभूव पूरुषः कश्चित्, न देवो न मानुषः प्रभवतीह कश्चन, इति वा इमौ प्रथितौ नाम्ना स्वरूपेण ~~सानुरूपेण~~ सानुरूपेण सत्त्वेन, इन्द्र उपेन्द्रश्च तावुभौ, विश्वेषामेव जगतामीशानौ सम्राजावपराजितौ प्रबभूवतुः,॥

एतद्वै भरद्वाज ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्।
"उभा जिग्यथुर्न पराजयेथे न परा जिग्ये कतरश्च नैनोः ॥
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥
(इति ॥ (ऋ॰ मं॰ ६, ६९, ८)

तद्वैभरद्वाजः –
पूर्णार्थे

एतद्वै प्रथितं तदैन्द्रावैष्णवं द्विदेवत्यं सत्त्वम्, तदध्यात्ममेवान्तरं स्वं परं रूपम्, विश्वेषामेव पुरुषाणामन्तः, तदेतदन्तर्हितं सत्त्वं भवति, इन्द्रो वा अयमान्तरः सन्नमृत एवात्मा प्रचेतनः। पुरुषोऽयं प्रत्यङ् नाभिपदेऽन्तरन्तर्हितश्चेतते, विष्णुर्वै हृदयं विश्वेषामेव

पुरुषाणां स हृदय्यः, प्रत्युपाहितश्चेतसान्तः, पुरुषोऽसौ शीर्षण्यः स उत्तमः, सर्वेषामेव पुरुषाणां शीर्षेऽन्तर्हितश्चेतते, सहस्रशो वै चितिभिर्भाभिरेव रश्मिभिस्तनुते प्रतिसंविदम्, तस्मात् स सहस्रशीर्षेति सुष्टुतः, "सहस्रशीर्षा पुरुषः" इति वै, तदभिष्टुतिः, उभाविमौ सङ्गच्छेते नाभितः एव स्वपदान्मूलतो मूर्धतश्चाभ्युदितौ, संविदा चेतनेनैव तन्तुना स्वसत्त्वनाऽन्तः, विश्वानेवेमान् पुरुषान् प्रति चेतयतः, ऐन्द्र्यैव वाचा ज्योतिषा शीर्षण्येन रसेनामृतेन सर्वानेवास्मान् प्रति तर्पयतः, संविदैव वाचा प्रति प्रबोधयतः, स्वेनैव सत्त्वेन सरसेनास्मान् प्रतिनन्दयतः, विश्वामेव भूतानां समृद्ध्यै, उतैषां प्राणभृतां प्रतिजीवनाय, परमं स्वं रसं सत्त्वं प्रतिसम्भरतः, सर्वानेवास्मान् बिभृतः, स्वेनैव सहसाऽभिरक्षतः, तस्मादेव तयोः सत्त्वे विश्वमेतत् प्रतितिष्ठति।

एतद्धि भरद्वाज ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्"

"इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ॥
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥"

इति (ऋ० ६, ६९, ५)

=

॥ इन्द्रापर्वतौ ॥

=

इन्द्रो वै वैद्युतो ज्योतिष्मान् समध्यमो देवतात्मा, पर्वतो वै घनः स उत्तमः स आप्यः, अमुष्मिन्नेव लोके सोऽद्रिरेव समृद्धः समिध्यते, अमुमेवेन्द्रः पर्वतं दिव्यं, समेनैव रसेन स्वेन विद्युतेवा-धितिष्ठति, विद्रिन्नं तद्विभिन्नं घनं ज्योतिषैव वैद्युतेन घटयति, उतैनमभिरक्षति, स्वेनैव सत्त्वेन समर्धयति, विश्वेषामेव भूतानां पुष्ट्यै प्रतिजीवनाय, उतान्नानां समृद्ध्यै प्राणभृतां तृप्त्यै, पर्वतं तं वज्रेण सम्भिद्य सहसा पर्जन्येनैव मुखेन प्रवर्षयति, तत एव तावुभौ सङ्गतौ विश्वस्यैव रक्षायै प्रभवतः, यज्ञेनैव तौ समृद्धौ विश्वमेतद्वर्धयतः।

वैतदनुश्रुतिः

+२ "यः पर्वतान् प्रकुपितां अरम्णात्" इति (२, १२, २)

+१ इन्द्रापर्वता बृहता रथेन वामीरिष आवहतं सुवीराः। वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥

(~~विश्वामित्रः~~) इति ~~वै तदनुश्रुतिः~~। (ऋ० ३, ५३, १)

=

॥ इन्द्राब्रह्मणस्पती, ॥ इन्द्राबृहस्पती ॥

= अथो पुनः स इन्द्र एव वाक्पतिः स प्रचेतनः,
वाक् वै ~~अथो पुनः~~ सा मध्यमा प्रचेतना, मध्यमे स्वे पदेऽन्तरिक्षे
विद्युतैवानुस्वरति, तस्मात्सा वैद्युती सती विश्वेषामेव प्रभवति, इन्द्रो
वा अयं मध्यमो विद्युदात्मा ज्योतिष्मान्, वैद्युतीमेव तां मध्यमां वाचं
ज्योतिषाऽधितिष्ठति, तस्या एव वाचः सोऽधिपतिः, तस्माद् वाचस्पतिः
स शचीपतिः सुष्टुतः, स रसात्मना सोमेन, उत सौम्येनैव मनसा
युज्यते, स बहिर्घाऽन्तर्घाच विश्वान्येव कर्माण्यनुतिष्ठति, तस्मात्
स विश्वकर्मा भवति, ~~इ~~एतद्वै ऋषिणा सुष्टुतम् ॥

"वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ॥
(इति, ऋ० मं० १०, ८१, ७।)

वाग् वा इयं प्रत्यक्षं ब्रह्म सत्यं, सा सती बृहती परमस्य
वै ब्रह्मणः परा, वाचमेव तामम्ं ज्योतिष्मतीं योऽधितिष्ठति।
ज्योतिषैव संविदा धिया चिता, तस्मात् स इन्द्र एव ब्रह्मणस्पतिः,
स बृहस्पतिः सुष्टुतः, एतद्वै तदिन्द्रस्यैव सत्त्वं ब्राह्मणस्पत्यं,
उतैतत् स्वरूपं बार्हस्पत्यं भवति।

इन्द्र एव ज्येष्ठः स ईशानोऽस्य विश्वस्यैवाध्यक्षो राजते स्वयम् ॥
तत्परमं ब्रह्म सत्यं विश्वाभिरेव भूतिभिः पूर्णं, तस्मात् तद् विश्वत एवा~~...~~।
(स्मात् परं ज्येष्ठं। तदैन्द्रमेव सत्यं वस्तु सद् बभूवाग्रे ॥

"तदिदास भुवनेषु ज्येष्ठम्" इति ऋषिष्टुतिः (ऋ० १०, १२०, १)
इन्द्र एवास्य विश्वस्य राजा प्रभवतीह सोऽध्यक्षः, "इन्द्रो यातोऽवसि-
तस्य राजा" सेदु राजा क्षयति चर्षणीनाम्" इति वै तदनुश्रुतिः"
(ऋ० मं० १, ३२, १५)

एतद्वै ब्राह्मणस्पत्यमेव सद्रूपं सत्त्वम्, तस्मादयं ज्येष्ठराजः
सुष्टुतः।

"ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते" इति ऋषिष्टुतिः (ऋ० २, २३, १)

"यस्तस्तम्भ सहसा विज्मो अन्तान्बृहस्पतिस्त्रिषधस्थो रवेण"
इति वै तदनुश्रुतिः (ऋ० मं० ४, ५०, १)

तादृ वैवारिष्ठुः
२ पृष्ठ में
५

इतिवा अयमिन्द्रश्च ब्रह्मणस्पतिश्च उतायं बृहस्पतिश्च, सह

वाचा मध्यमया सञ्जग्माते, मिलया परया चिता, तस्मादेव तौ समानौ नाम्ना स्वरूपेण सत्त्वेन धाम्ना, शक्त्या च शच्या वाचा संहितौ। वाचस्पती एव सन्तौ विश्वस्यैवास्य जगतः प्रभवतः, ऐन्द्राब्राह्मणस्पत्यमेव तद्द्विदैवत्यं सत्त्वम्, उतैन्द्राबार्हस्पत्यं तत्स्वरूपं समानम्॥

३ ६ पुढचे लिहावया

"एतद्वै वसिष्ठ ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्॥

"तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे॥

इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा॥

(इति।। (ऋ० ७, ९७, ३.)

"अच्छेन्द्राब्रह्मणस्पती हविर्नः, विश्वं सत्यं मघवाना युवोरित्॥"

(ऋ० २, २४, १२)

"बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य॥

(ऋ० ७, ९७, १०)

"इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे" इति वै तदनुश्रुतिः॥

(ऋ० मं० ४, ४९, ५)

=

इन्द्र एवायमान्तरतमः, स आत्मा परमः प्रचेतनः। सर्वेषामेव प्रत्यङ्ङन्तर्हितश्चेततेऽन्तः, स वै ब्रह्मणस्पतिरेवेन्द्रः, वाग् वै ब्रह्म सत्यं, छन्दसा स्वेन ब्रह्मणैव वाचा दक्षिणया संहितः, स प्रमुखया प्रत्यृतः, वाग्रसवित्तमः सन् ब्रह्मवित्तमो भवति,

प्राणो वै ज्येष्ठो ब्रह्मणस्पतिर्बृहस्पतिश्च स प्रमुख्यः मुख्ययैव दक्षिणया वाचोपक्लृप्तो वाक्सत्त्वः, प्राणो वै ब्रह्म ज्येष्ठं; सर्वेषामेव प्राणानां श्रेष्ठं, इन्द्रस्यैव तद् रूपं, ऐन्द्रः स प्राणः प्राणानां प्राणः स मुख्यः सोऽधिपतिः, ब्रह्मणस्पतिः स सोमः स मानसः, मनो वै ब्रह्म तदृतम्। मनसः सोऽधिपतिः। असौ ऋतपाः सन् मनः सत्त्वः, तस्मादेवेमौ वाक् प्राणौ, इमे च वाङ्मनसे, ब्राह्मणस्पत्यमेव सत्त्वं विश्वतः, बार्हस्पत्यमेवैतत्। इति वा द्वन्द्वेन नैकेनात्मना वाक् च प्राणश्च मनश्च, संविदा कर्मणा कामेनोपक्लृप्तं सन्मिथुनं, तदैन्द्राब्राह्मणस्पत्यं उतैन्द्राबार्हस्पत्यं च तदध्यात्मं अधिदैवत्यं, सर्वमेव सत्त्वं समृद्धं प्रपूर्णं भवति।

"स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः, सोमो हिनोति मर्त्यम्।

"त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम्, दक्षिणा पात्वंहसः॥

मेधातिथिः इति वै तदनुश्रुतिः ॥ (ऋ॰मं॰ १,१८,४-५)

(ऐन्द्रार्भवम्)

॥ इन्द्र ऋभुमान् ॥ ऋभव इन्द्रवन्तः ॥

=

अथो पुनरस्मिँल्लोके प्राणभृतो य इमे मनुष्याः सचेतसः, तेजसाऽद्भिरन्नेनैव सुखेन। विश्वैरेव भूतैरुत भूतसत्त्वैः प्रभृताः सन्तः, मिथुनेनैव प्रजायन्ते, भौमैरेवान्नैः सरसैः सतेजस्कैः, प्राणैश्च मनसा वाचाऽभिवर्धन्ते, कलयैव स्वमपत्यं वर्धयन्तः स्वेन सुवीर्येण, तदपत्येनैव सुखेन ते बहुधा प्रच्यवन्ते, तथेन्दोरिवैव कलया प्रति क्षीयन्ते, ते स्वरूपतश्चाकृतः शीर्यन्ते, पृथिव्यामेव ते म्रियन्ते, तस्मादेवेमे प्रथिता मर्त्याः, मृतिपरास्ते मरणायना मरणायतनाः सन्त एव सम्भवन्ति, तस्मादेवामृतत्वाय ते स्पृहयन्ति, उत मरणादेवेमे बिभ्यति, मृत्योरेव मुखाद् भयात् प्रतिमोचनाय, इन्द्रमेवाभ्यर्थयन्ते, तं स्वमीशानं पतिं संस्तुवन्ति।

"यत इन्द्र भयामहे ततो नो अभयं कृधिः"

(ऋ॰मं॰ ८,६१,१३)

"मृत्योर्मुक्षीय माऽमृतात्" इति वै तदनुश्रुतिः ॥

(ऋ॰७,५९,१२)

=

इति वै पूर्वे ऋषयः परमं तमिन्द्रमेव शरणं व्रजन्तः, बन्धादेव भयान्मृत्योश्च तमसः प्रतिमुक्त्यै, तमिन्द्रमेवाभिष्टुवन्तः छन्दसैव वाचा ब्रह्मणा, भयादेव ते विमुक्ताः सन्तः, अमृतत्वं परमेवाभयं प्रापुः।

"एतद्वै गौरिवीतिः शाक्त्य ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत् ॥

"वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः।
अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान्निधयेव बद्धान् ॥"

(इति॥ (ऋ॰मं॰ १०,७३,११)

इन्द्रस्यैव तत्सखित्वं, परमेणैवामृतत्वेन पूर्णम्, ऐन्द्रेणैव सत्त्वेन तत्समृद्धं, तदिन्द्रसख्यं परम, मरुत इवैव कामयमानाः, इन्द्रेणैव तेन योगाय यतमानाः, तपसोत योगेन, सत्येन वै

यज्ञेनोत धर्मेण, उत सत्यमन्त्रेण, येऽङ्गिरसः पूर्वे ते ऋषयः। साक्षादेवामृतत्वं प्रतिपेदिरे, भद्रमेवाभयं तत्पदं तत्परमं धामैवोपजग्मिरे।

एतद्वै नाभानेदिष्ठो मानव ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्॥

"ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश॥
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥"
(इति,, (ऋ० मं० १०, ६२, १)

इति वै स इन्द्र एव स्वयं सोऽपमः सोऽमृतः सन्नभयः पुनः। विश्वेषामेव सोऽधिपतिः सन्, उभयकृदेव प्रभवति, उत स्वस्तिकृत् सुमङ्गलः, आत्मानमेवोपासानां सर्वमेवभयं प्रहरति, अभयमेव प्रतिददाति, सर्वेभ्यो वै देवेभ्यः। उत मानुषेभ्यः, प्रवरः सन् वरदः, आत्मान एवानुव्रतेभ्यस्तेभ्यः, स्वीयमेव सौम्यं रसं सत्त्वं ददातीन्द्रः, तानेव पुरुषान् पुनः, स्वीय एव सख्येऽनु गृह्णाति, अमृतानेवैतान् प्रतिभावयति, स्व एवायतने स्वे पदे, परस्मिन्नेवामृतत्वे प्रतिष्ठापयति, इन्द्रस्यैव तत्सखित्वं परम्।

"एतद्वै शासो भारद्वाज ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्॥

"स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेन्द्रः पुर एतु नः सोमपा अभयङ्करः॥ इति॥ (ऋ० मं १०, १५२, २)

"अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्॥
प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु॥

इति वै तदनुश्रुतिः परिशिष्यते सा सत्यमन्त्रा, एताः सत्याशिषो भवन्ति॥

=

इति वै पूर्वेऽङ्गिरस इवैव तपसाऽभ्युदिताः, अस्मिन्नेव लोके मनुष्याः, नाम्ना ते प्रथिता ऋभवः, ये सुतास्ते सुधन्वनस्त्रयः, तपसा छन्दसैव ब्रह्मणा ऋषयस्ते बभूवुः, ऋभुर्विभ्वा च वाजश्च, सत्यमन्त्रास्ते सत्यव्रताः सत्यधर्माणः सन्तः, विश्वस्मिन्नेव सदर्थे प्रबभूवुस्ते समर्थाः।

"सौधन्वना ऋभवः सूरचक्षसः॥ (ऋ० १, ११०, ४)

"ऋभुर्विभ्वा वाज इन्द्रो नो अच्छ॥ (ऋ० मं० ५, ३४, २)

इति वै तदनुश्रुतिः॥

यज्ञेनोत धर्मेण, उत सत्यमन्त्रेण, येऽङ्गिरसः पूर्वे ते ऋषयः। साक्षादेवामृतत्वं प्रतिपेदिरे, भद्रमेवाभयं तत्पदं तत्परमं धामैवोपजग्मिरे।

एतद्वै नाभानेदिष्ठो मानव ऋषिस्तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत्॥

"ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ॥
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥"
(इति,, (ऋ० मं० १०, ६२, १)

इति वै स इन्द्र एव स्वयं सोमपः सोऽमृतः सन्नभयः पुनः। विश्वेषामेव सोऽधिपतिः सन्, उभयकृदेव प्रभवति, उत स्वस्तिकृत् सुमङ्गलः, आत्मानमेवोपायानां सर्वमेवभयं प्रहरति, अभयमेव प्रतिददाति, सर्वेभ्यो वै देवेभ्यः। उत मानुषेभ्यः, प्रवरः सन् वरदः, आत्मान एवानुव्रतेभ्यस्तेभ्यः, स्वीयमेव सौम्यं संसत्वं ददातीन्द्रः, तानेव पुरुषान् पुनः, स्वीय एव सख्येऽनु गृह्णाति, अमृतानेवैतान् प्रतिभावयति, स्व एवायतने स्वे पदे, परस्मिन्नेवामृतत्वे प्रतिष्ठापयति, इन्द्रस्यैव तत्सखित्वं परम्।

"एतद्वै शासो भारद्वाज ऋषिस्तपसाऽन्वपश्यत् तदृचा वाचाऽन्ववदत्॥

"स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ॥ वृषेन्द्रः पुर एतु नः सोमपा अभयङ्करः॥ इति॥ (ऋ० मं १०, १५२, २)

"ॐ ह्रीमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्॥
प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु॥

इति वै तदनुश्रुतिः परिशिष्यते सा सत्यमन्त्रा, एताः सत्याशिषः समाशिषो भवन्ति॥

=

इति वै पूर्वेऽङ्गिरस इवैव तपसाऽभ्युदिताः, अस्मिन्नेव लोके मनुष्याः, नाम्ना ते प्रथिता ऋभवः, ये सुतास्ते सुधन्वनस्त्रयः, तपसा छन्दसैव ब्रह्मणा ऋषयस्ते बभूवुः, ऋभु र्विभ्वा च वाजश्च, सत्यमन्त्रास्ते सत्यव्रताः सत्यधर्माणः सन्तः, विश्वस्मिन्नेव सदर्थे प्रबभूवुस्ते समर्थाः।

"सौधन्वना ऋभवः सूरचक्षसः" (ऋ० १, ११०, ४)

"ऋभुर्विभ्वा वाज इन्द्रो नो अच्छ" (ऋ० मं० ४, ३४, २)

अथो पुनस्तपसैव यतमानाः, ऋभवस्ते मनुष्या एव सन्तः, तेजसा वर्चसा ज्योतिरात्मनो ज्योतिर्मूर्तयः समृद्धाः, पानेनैवामृतस्य सोमस्य, उत संविदा कामेन कर्मणा च अमृतास्ते बभूवुः, साक्षादेवामृतात्मानः सन्तः, तपसैव पुनरिन्द्रेणैव परमेणात्मना सञ्जग्मिरे, अमृतत्वमेव पुनः प्रतिपेदिरे, इन्द्रस्यैव तत् सखित्वं सत्यम्, परमेवामृतत्वम्, मरुत इवैवाङ्गिरस इवैव प्रत्यृताः, इन्द्रसखास्ते सन्तः। इन्द्रात्मान एव ते बभूवुः।

मरुतो वै देवाः दिव्याः, अङ्गिरसो वै ऋषयः, ऋभवो मनुष्याः, इन्द्रेणैव सङ्गता तत्सखित्वेन तेन योगेन अमृतत्वमेवोपाप्नुवन्॥

एतद्धै कुत्स आङ्गिरस ऋषिस्तपसाऽन्वपश्यत् तदृचा वाचाऽन्ववदत्॥

"विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः॥ सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः॥

(इति" ऋ० १,११०,४)

'सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया॥ इति वै तदनुश्रुतिः॥ (ऋ०मं०)

=

ऋभूणां वै मनुष्याणां तदृषित्वम्, उत ऋषीणां तद्

ऋभूणाममृतत्वम्। दिव्यं जन्मैव तद् भवति, ऋभवस्ते तपसेन्द्रेणैव सह यद्धैतत्सम्पपुः सोमम्, तत एवामृतास्ते अभवन्, सोमेनैव सेन तेन रसेन प्रपीतेन। स्वेनैवानुभावेन समेनाभ्युदिताः ज्योतिरेवोपसञ्जग्मुः, ज्योतिषा तेन सयुजस्ते संविदा ज्योतिरात्मान एव ते बभूवुः,

"अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्"

इति वै तदनुश्रुतिः, (ऋ मं० ८,४८,३)

=

यथा वा मरुत्वान् स इन्द्रः, सन्नेवायमात्मा स प्राणः, मरुदिन्द्रवान् प्राणः समात्मा, मिथुनात्मानौ तौ प्रभवतः,

यथा वै पुनरङ्गिरस्वान् स इन्द्रः, उताग्निरयमङ्गिराः स इन्द्रवान्, मिथुनात्मानौ ताविमा विन्द्राग्नी एव भवतः,

"त्वमग्ने प्रथमो अङ्गिरा ऋषिः" इति ऋषिश्रुतिः,

(ऋ० मं० १,३१,१)

तथा वै स ऋभुमानिन्द्रः, उतेन्द्रवन्तस्ते ऋभवः, मिथ एव योगेन तेन सख्येन विभ्वे ते प्रबभूवुः,

"इन्द्र ऋभुमान् वाजवान् मत्स्वेह नः" (ऋ०मं० ३।६०।६)

"ऋभुमन्तं वाजवन्तं त्वा कवे" (ऋ०मं०)

इति वै तदनुश्रुतिः।

तस्मादेव यज्ञे देवानामृषीणां च। दिव्यमेव सत्वं प्रत्यृताः। ऋभवस्तेऽग्नयो वाच एवाधिपतयः। इन्द्रेणैव योगेन समृद्धौ ताविन्द्राग्नी एव सन्तौ। मिथः प्रतियोगेन समृष्टौ। अग्नीन्द्रौ तौ वागिन्द्रौ शचीन्द्रात्मानौ भवतः॥ तस्माद्यज्ञे हविष्ये सौम्ये, आहुति भाजौ तौ हविर्भुजौ सोमभागौ रसपौ सोमपौ स्वेषु सवनेषु स्तोम भागौ च भवतः।

इति वै तदैन्द्राग्नं हविष्यं, ऐन्द्राग्नो यज्ञः समिध्यते। ऐन्द्राग्नेयं सोमसवनम्, सैन्द्राग्नेयी सोमाहुतिः, ऋभवस्ते त्रिषु लोकेषु प्रतितिष्ठन्ति, ज्योतिरात्मानस्त्रयः पूरुषाः, ऋभुर्वै प्रथमः सोऽयमग्निर्हविर्भुक्, विभुर्वै विभ्वा स मध्यमः, भावेनैव विभुना विश्वं प्रत्यृतः, "विभ्वाऽभवत् समृते मातरिश्वा" इति ऋषिस्तुतिः।

वाजो वा अन्नं दिव्यं तेजः सम्भृतं रसेन, तस्मादसौ वाजवान् स सूर्यः, असावेव वाजी नाम्ना स रूपेणाभ्युद्गात् स वाजः, सौम्यं वै यज्ञमृभवस्ते तपसाऽधितस्थुः। इन्द्रेणैव सह सोमं तं दिव्यं तदमृतं सद्रसं पपुः, सोमेनैव रसेन सौम्येन ऋभवस्तेऽमृतत्वमापुः, तस्य वै सौम्यस्य सद्रसस्य, पात्रं तच्चमसं तत्समानमेकम्, सौम्यमेव तन्महः, सन्महोरस प्रभृतं, तत्पदं परमं, तद्वै रस एवामृतं तत् पवित्रम्, ऋभवस्ते सत्यमन्त्राः सन्तस्तेऽग्नयस्त्रयः, पदेषु त्रिषु भुवनेषु, देवानां तं यज्ञियं भागं तद्धविर्हौम्यं हव्यम्। उत पात्र्यं सारस्यं सौम्यं सन्दधिरे, इन्द्रायैव सोमं प्रजुहुवुः, इन्द्रेणैव तत्सखित्वमुपजग्मुः, इन्द्रेणैव पुनः सौम्यं तदमृतं प्राति पपुः, इन्द्रस्यैव तत्परमं धाम सञ्जग्मिरे, त्रीणि वा इमानि ऋभूणां पदानि, भागा एव ते त्रयः। सोमस्यैव सद्रसस्य भवन्ति, एकं तत्परमं पदं तुरीयम्, तुरीय एवेन्द्रस्यैव भागः परमः,

तस्मात् तच्चमसं चतुष्पदमेवाचक्षते। "एकं विचक्र चमसं चतुर्धा"
"एकं चमसं चतुरः कृणोतन" (ऋ० मं० १।१६१।२)
"उतत्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम्॥
अकर्त चतुरः पुनः॥ इति वै तदनुश्रुतिः॥ (ऋ० १।२०।६)

मन्तः।

स एवं विद्वांसः, ऋभव इवैव तपसा, यज्ञेन घेमेन, बहिर्ध्यान्तर्द्योत सोमं पिबन्ति, इन्द्रेणैव सहात्मना, तेन परमेण, तत्सवित्वमेवोपाप्नुवन्ति, अमृतत्वमभयं पदं परमं प्रतिविन्दन्ति, तस्मिन्नेव पदे परमे प्रतितिष्ठन्ति।

एतद्वै तदिन्द्रस्यैव तत्सवित्वम् सन्महत्वम्॥
इति वै पूर्वे ऋषयस्ते तपसाऽन्तः सन्ददृशुः,
एतद्वै कश्यपो मारीच ऋषिस्तपसान्वपश्यत। तदृचा वाचाऽन्ववदत्॥

"यत्र ज्योति रजस्रं यस्मिँल्लोके स्वर्हितम्॥
तस्मिन् मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परिस्रव॥ इति। (ऋ० मं० ९, ११३, ७)

=

"विश्वस्मादिन्द्र उत्तरः" (ऋ० मं० १०।८६।१)

"इन्द्र इद्धि श्रुतो वशी" (ऋ० मं०

"सर्वं तदिन्द्र ते वशे" (ऋ० मं० ८, ९३, ४)

"इन्द्रो विश्वस्य राजति" साम० ४५६)

"भद्रा इन्द्रस्य रातयः" (ऋ० मं०

इति वै तदिन्द्रस्यैव महत्वं सा परमा प्रतिष्ठा।

वीरः इन्द्रः

इन्द्रो वै वीरो वीरवत्तमः, विश्वेषामेव वीराणां सोऽग्रणीः, आत्मन एव महसा सोऽजति, स आत्मन एव वीर्येण विश्वान्येव भुवनान्युत भूतानि विजिग्ये, विश्वेषामेव देवानां उत मनुष्याणां स विजेता प्रभवति, अस्मिन् वै लोके उतामुष्मिन् वै दिवि। तस्य जेताऽस्ति पूरुषो न कश्चित्, तस्मादेवापराजितः स सुवीरः, स्वेनैव सुवीर्येण विश्वमेतदभिजयति, विश्वानेव सुवीरान् वीरवत्तरान् स जिग्यायाग्रे, तस्मात् स वीरवत्तमः सम्वृद्धः। (प्रवृद्धः।)

विश्वैरेव वीर्यैः स प्रवृद्धः, स्वैरेव सत्त्वैः उत कर्मभिः सर्वैरेव गुणैः पूर्णः, तस्माद् ब्रह्मैव स प्रभवति, आत्मन एव शक्तिभिः। महतीभिरेव चित्तिभिः स महान् स महीयान्।

एतद्वै काण्व हरिम्बिठि ऋषिस्तपसाऽन्वपश्यत्, तद्वचा वाचाऽन्ववदत्।

"इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः, महान्महीभिः शचीभिः॥ (इति। ऋ० ८; १६, ७)

तस्मादिन्द्रस्यैव तत् परमं वीर्यं, विश्वेभ्यो वै वरिष्ठम्, विश्वस्यैव जयकृत् सुवीर्यं तत्प्रकृष्टं, विश्वस्मिन्वै विशिष्टम्, वीराणां तद् भयकृद्, सखीनां वै श्रद्दधानानामनुव्रतानां अभय-कृदेव तद्वीर्यं भवति, तस्मात् पूर्वे ते ऋषयः। इन्द्रस्यैव तत्पुराणं वरिष्ठं वीर्यं तुष्टुवुः, इन्द्रमेवानुव्रजन्तास्तमुपासमानास्तपसा तेन योगेन, ऐन्द्रं वीर्यमेवोपप्रापुः।

एतद्वै ऋषिणा सुष्टुतम् "इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री," इति॥ (ऋ० १, ३२, १)

इन्द्रस्यैव सुवीर्यं सर्वमेतद् भवति, तस्य सुवीर्या वाक् प्रशासनी विश्वस्यास्य जगतः, विश्वेषामेव जगतां सोऽध्यक्षः, तस्मात् स सत्यमन्त्रः प्रभवति, छन्दसा ब्रह्मणैव मुखेन। वाचेव सुवीर्यया विश्वमेतद्यमयति, विश्वेषामेव देवानां (वा) उत मनुष्याणां, सम्प्रशास्तीह सत्यं सुहितं वस्तु सत्त्वम्, यद्वद्वै छन्दसैव मुखेन वाचा सोऽनुशास्तीन्द्रः, इन्द्रस्यैवानुशासनेन, उतेन्द्रेणैव प्रशासनेन,

विश्वे वै देवा अग्निमुखाः उत मनुष्याः पशवः प्राणभृतः, सर्व एवेमे प्रतितिष्ठन्ति, तत्प्रशासनमेवानुवर्तन्ते नित्यम्, सुवीर्यं वै प्रज्ञानं तदिन्द्रस्यैव भवति, सुवीर्या सा प्रज्ञा, सुवीर्यं वै मनः, सुवीर्यमेव कर्म, यद्यद्ध कामयते मनसा स इन्द्रः, सद्य एव तत्समृध्यते सर्वम्, तस्मात् स सत्यमन्त्रः, सुवीर्या वै प्राणाः, ऐन्द्रेणैव सहसा स सुवीर्येण। सर्वे प्राणाः प्राणभृतः प्रचरन्ति, अमुनैवोपजीवन्ति सर्वे, तस्मात् पूर्वे ते ऋषयो विप्राः, उत ते राजन्याः सुवीराः पुरुषाः उत स्त्रियः, गामश्वं भूमिं धनमन्नं बलं हिरण्यं। सर्वमेव भूतिं प्रतिकामयमानाः। विश्वस्यैवास्य विजित्यै, राज्यस्यैवोपाप्त्यै, राष्ट्रस्याधिपत्याय स्वराज्याय, उत राष्ट्राणां प्रतिष्ठित्यै, शत्रूणामेवाभिभूत्यै, वीराणां विजित्यै, विश्वेष्वेवाहवेषु। उत योगेषु संयुगेषु। आत्मन एव प्रभावाय, आत्मन एव विजयाय। इन्द्रस्यैव सख्यं, इन्द्रस्यैवानुयोगं प्रतिकामयमानाः। इन्द्रमेवाह्वयन्तः। धीभिरेवानुसन्दधानाः। सर्वमेव समिष्टं प्रति पेदिरे, विश्वेषामेव विजयेनैव समृद्धाः॥

एतद्ध मधुच्छन्दा वैश्वामित्र ऋषिस्तपसाऽन्वपश्यत्।

चानाचाऽन्ववदत् तमित्सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिन्द्रो वसु दयमानः॥ इति (ऋ० १, १०, ६)

"।यः शूरेभिर्हव्यो यश्च जिग्युभिः" इति वै तदनुश्रुतिः। ~~कुत्सः~~

(ऋ० १, १०१, ६)

तस्मादेवेन्द्रः स सुवीरः, विश्वैरेव सुवीर्यैः सत्त्वैः स वीरवत्तमः, स्वयमेव सन् पुनः, आत्मन एवानुव्रतान् अनुगामिनः सखीन्, तान् सुवीरान्। वीर्येषु तेषु भावेषु, उत सत्त्वेषु कर्मसु प्रबलेषु प्रतिप्रेरयति, स्वेनैव वीर्येण तान् प्रवीरयति, वीर्यमेव स्वं समीरयन् स इन्द्रः। वीर्येणैव मुखेन वीरेष्वेव तेष्वनु प्रविशति, उतैन्द्रीमेव चित्तिं समूर्जयति, अथो वीरवत्तराणीह पुनः सुवीर्याण्येव कर्माणि कारयति, तेषामेव विजितिं प्रति भावयति, सर्वमेव तत्समिष्टं समृद्धं कुरुते स्वयम्, तस्मादेव वीरवत्तमः स इन्द्रः। तत एवापराजितः, इति वै तमिन्द्रमेव विश्वस्यैवाधिपतिं विदन्तः। तमेवेन्द्रं शरणं व्रजन्तः। आत्मन एव प्रभावाय। आत्मन एव शान्त्यै। इन्द्रमेवोपजग्मुर्विप्रा॥ एतद्ध छन्दोदर्शनं भवति।

"यो वीरान् वीरयतीह वीर्येषु यो वीरेषु प्रविष्टः प्रवीर्येण॥

वीराणां यो वीरवत्तमः पतिरिन्द्रमेव तं वृणे शंममध्यै ॥
इति॥(छन्दोद॰ अनु॰ ४।७।१०)

इति वै पूर्वे ते ऋषयः ये वै तपसा शान्ताः आत्मन एव परस्यै शान्त्यै यतमानाः, विश्वत एवास्माद् भवाद् सतः, उत भावाद् दुरुदितादसत्यात्। प्रतिसन्निवृत्ताः सन्तः, परमेवाभयं प्रतिकामयन्ते, आत्मानमेव प्रत्यञ्च मनुध्यायन्तः, आत्मन एव सत्वमन्तरनुसन्दधानाः सन्तः, आत्मन्येव विरमन्तेऽन्ततः, त एते पराचीनानर्थान् - उत पराचीं वाचं नानुस्मरन्तः मौनमेव सम्भजन्ते, तेषां वै निरंहसां सतां। आत्मन एवानुव्रतानां। उत सत्यव्रतानां। अमृतस्य समृध्यै, परमस्यैवामृतस्य रसस्योपाप्त्यै, स्वेनैव रसेन समेन। इन्द्र एव स्वयं सखा भवति। इन्द्र एव तान् मुनीननुगृह्णाति स्वेनामृतेन, अमृतत्वे परमे पदे प्रतिष्ठापयति, "इन्द्रो मुनीनां सखा" इति ऋषिष्टुतिः।
(ऋ॰ ८।१७।१४)

इति वा इदं विशिष्टं प्रकृष्टमेवेन्द्रस्य सत्त्वम्। तत्परिशिष्टमेवेदं भवति, आत्मन एवानुव्रतान् स इन्द्रः। विश्वस्मादेवांहसः प्रतिमोचयति, दुरितेभ्यो वै दुर्गमेभ्यः। उत दुःखेभ्यस्तेभ्यस्तारयति, सर्वेषामेवाङ्गानां सद्रसां सन्रससत्तमः स इन्द्रः, प्राण एव समुख्यो विश्वस्यैवास्य जगतः, सर्वेषामेव भोक्ता, विश्वेभ्यो वै तेभ्यः। विश्वमेव स्वस्ति सत्त्वं सन्ददाति, विश्वत एवाभयं कुरुते, तस्माद् विश्व एव देवाश्च ऋषयो मनुष्याः स्वं वै तं इन्द्रमेव शरणं प्रतिपद्यन्ते। छन्दसैव मुखेन ब्रह्मणा वाचा। अभयमेवाभ्यर्थयन्ते।

" अंहोमुचं माङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्
प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु ॥

(इति॰ ऋ॰ मं॰ ५, ८४ सूक्तानन्तरम्)

(परिशिष्टम्)

इन्द्र शक्तिः

इन्द्रो वै प्रचेतनः स पुरुषः, परमः स आत्मा विश्वाभिरेव भूतिभिः पूर्णः स विश्वत एवातति स्वयम् ॥ तस्माद् वै ब्रह्म परमं ब्रह्मन् ब्रह्मा, सुसन्दृगेव ऋषिर्विश्वस्यैवाध्यक्षः, स आत्मन एव विश्वाभिः शक्तिभिर्वाक् चितिभिः शचीभिः स महान् बहुधाऽभिहितः प्रहूतः, स विश्वत एवास्मात् परोऽभिवृद्धो राजते,

एतद्वा इरिम्बिठिः काण्व ऋषिस्तपसाऽन्वपश्यत् । तदृचा वाचाऽन्ववदत् । "इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरु पुरुहूतः । महान् महीभिः शचीभिः ॥

(ऋ. मं. ८, १६, ७)

इन्द्रो वै ब्रह्मा ब्रह्मण एवाधिपतिः, वाग्वा इदं प्रत्यक्षं ब्रह्म-सत्यं, तस्माद् ब्रह्मणस्पतिः स इष्टः, "स पुरन्ध्या योषिता वाचा विधृतः, वाचैव विश्वे सुसक्तः, तस्या एव धर्ता स भर्ता प्रभवति ॥

एतद्धि ऋषिणा सुष्टुतम् (ऋ.) इति

"त्वं ब्रह्मा रयिविद् ब्रह्मणस्पते त्वं विधर्तः सचसे पुरन्ध्या"

"तथा परया तया निजया शक्त्या शच्या विश्वस्यैवास्य विधर्ता सदाधारतमः सम्प्रतिष्ठा भवति ॥

इति वै स इन्द्रः पुरुष एव स्वयं सन्, नाम्ना सरूपेण वैश्व-रूप्येण मुखेनात्मना समाविर्भवन् पुनः, निजयैव चिता परया सम्बभूवाग्रे स शक्तिः सत्त्वः,

यत एव स इन्द्रस्त्रेधा रूपेणाभ्युदियाय स्वयम्, ब्रह्म चेन्द्र-श्च शक्तिश्चेति प्रक्लृप्तः, तस्मादेव शक्तिः सेयं परा सती स्त्रीत्येवाचक्षते, शक्तिरेव सेन्द्रस्य वै रूपस्य शं चिनोति, तस्मादेव सा शचीत्याचक्षते, ब्रह्मणो वै वाच एव तत्सत्त्वम्, विश्वस्यैवास्य जगतो मूलम्, तदाधार पदं परम्, तस्माद् विश्वेषामेव पुरुषाणामुत योषितां सा मूलपदे राजते, उभयोरेव पादयोः सा मध्यमे सन्धि-पदे शेतेऽन्तरन्तर्हिताऽऽत्मनि, तस्मादध एवान्तरधस्तनामान्तरां तां प्रतीचीं प्रति पश्यन्ति नो परिष्टात्, पादौ तावुभौ स सत्त्वौ योजयन्ति, न पुनस्तौ प्रपश्यति, यत एव तौ कश इवैव प्लवेते, कश इवैवैनं

प्लावयतः, तस्मादेव तौ कशप्लकावित्याचक्षते, अथो पुनस्तावुभौ पदौ संयुतौ कुर्वन्तः संयतौ तौ सुस्थिरौ भावयन्ति, तथैवोपदिशन्ति।

एतद्वै मेध्यातिथिः काण्व ऋषिः-- तपसाऽन्वपश्यत्। तदृचा

वाचाऽन्ववदत्। "अधः पश्यस्व" इति (ऋ० ८, ३३, १९)

अधः पश्यस्व मोपरि सन्तरां पादकौ हर। मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ।

[इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरु = पुरुहूतः। महान् महीभिः शचीभिः॥]

इयमेवेन्द्रशक्तिः परमा, इन्द्रस्यैवेयं शक्तिः सा शची वाक् परा, तस्मादेवेन्द्रः शचीपतिर्भवति॥

अथो पुनरस्मिँल्लोके सर्वेष्वेव मनुष्येषु। उतामुष्मिन्वै दिवि विश्वेष्वेव देवेषु, सैवेन्द्रशक्तिः सेन्द्रेणैव सह प्रतितिष्ठति। ऐन्द्रेणैव वीर्येण चेततेऽन्तः, अथाप्यसौ सेयमैन्द्री सती इन्द्र इवैव न प्रतिदृश्यते दृशा, अत एव प्रसुप्ता प्रचेतना सेयमनृतात्मैव प्रभवति, वाक् सत्वैव परा सा आत्मनैवेन्द्रेण सा समाना, संविदानाऽन्तर्निधीयते निधिरिवैवान्तर्हिता राजते, यस्मिन्वै पुरुषे दिव्ये देवतात्मनि उत मनुष्ये मर्त्ये, सेयमिन्द्रशक्तिरधोनिष्ठा सती, उभयोरेव सक्थ्नोरन्तः मूले स्व एवाधारपदे शेते, लम्बमानाऽन्तर्मुखा सा प्रतीची प्रत्यङ्चितिः, स्वं सुखं बिभर्ति, तस्मादेव सा "कपृद्" इत्याख्यायते, कपृदेवेयमिन्द्रशक्तिः सा पुनर्यस्मिन्न बलैवैव सती अधीरेवैवान्तः स्वपन्तीव तूष्णीमेवास्त्यलन्धिया, राजते, स वा अयं पुरुषो मर्त्यः, उत दिव्यो देवतात्मा उतेयं सती नारी नेशे सोऽयमन्यानीशितुं स्वेनैव बलेन, तस्मान्मानुषेणाल्पेन मर्त्येन, नैव प्रभवति,

अथो पुनस्तपसाऽन्तस्तपश्यन् वाचा प्राणेन मनसा च सह विश्वासामेनधियां योगेन तस्या एवेन्द्रशक्तेः आत्मन्यन्तरभ्युदयाय नित्यं यतमानः, रोमशं कार्ष्णं रौरवं वा वैयाघ्रं वाऽजिनं तदाश्रित्य, सुस्थिरं तत्र निषीदति,

तस्यैव, योगेन तपतो वै सेन्द्रशक्तिः सुषुप्तान्तः प्रबुध्यते स्वयम् सोर्ध्वमुखा सती भवन्ती योगेनैव विजृम्भते, ऐन्द्रेणैव वीर्येणान्तरुत्तेजयताऽभ्युदेति, इन्द्र इवैवोत्थिता सा विश्वस्मादेवोत्तरा सती मूर्धानमध्यारोहति, मूर्धन्येवान्तस्तात्मनि स्वे पदे स्वेन्द्रयोनि-

प्रतितिष्ठति, स एवायं मर्त्यः ऐन्द्रेणैव वीर्येण समृद्धः, वीर्याण्येव कर्माणि कर्तुमीशे, सर्वानेवान्यानीशितुं प्रभवति, यत एव खलु वै विश्वस्मादेवेन्द्र एवोत्तरः श्रेष्ठो वरिष्ठः तस्मादेव सेन्द्रशक्तिः इन्द्र इवैव वरिष्ठोत्तरा सती विश्वानेवोत्तारयितुं प्रभवति, तस्मादिन्द्रशक्तेः सत्त्वं तत्परमम् ।

एतद्वै तदिन्द्राणी ऋषिका तपसाऽन्वपश्यत्.

"न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत् ।।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः ।
इति १०, ८६, १६

अथो पुनर्यद्वै तद्वैपरीत्येन योगेन यस्तापस्यन् कार्ष्णमन्यतरं वा रोमशं ह्याजिनं तदधिश्रित्य निषीदति, तस्य वा अस्य पुरुषस्य यतात्मनः, वैपरीत्येन योगेन, इन्द्रशक्तिः पराङ्मुखाऽभ्युदिता. सती सोच्छृङ्खला सोद्रिक्ता सोद्वेगतएव विजृम्भते, नेशोऽयं पुरुषस्तामनुसर्तुम्, ग्रहीतुं सोढुं, सोऽयं बलादपहृतोऽन्यानीशितुं न प्रभवति, नान्यदेवापि कर्तुं नेशे स किञ्चित्.

अथो पुनर्यस्तपस्यन् योगेनान्तः प्रत्यङ्मुखः, प्रशान्तेनैव हृदयेनवा अन्तर्विलीनेन, प्रत्यञ्चमेव स्वमात्मानं तमिन्द्रमेवानुसन्दधानः सुदृढोऽयमचञ्चलः प्रशान्त एवोपरमतेऽन्तः, यस्य वै तस्येन्द्रशक्तिः सा प्रशान्ता ऐन्द्रेणैव वीर्येण सक्थ्नोरेवान्तरे स्वे पदे मूले शान्त्यैव कलयाऽन्तः प्रतिशेते स्वयम्, प्रत्यङ्मुखैव समृद्धा सेन्द्रशक्तिर्वाक् सत्त्वा परात्मा प्रचेतना, परमेवात्मनः सुखं पिपर्ति, परमेव स्वरसं प्रापयति, कपृदेव सत्सतीन्द्रशक्तिः, आत्मन एव प्रशान्तेन समेनैव रसेन, सौम्येनैव शीघ्रण्येनाम्लेन, तस्मादेव स्वस्मादिन्द्र योनिपदात् संस्नुतेन, सर्वानेव नन्दयितुं प्रभवति, यत एव स इन्द्रो विश्वस्मादेवोत्तरः समिद्धः, इन्द्र इवैवोत्तरा सती सेन्द्रशक्तिः सर्वथैव प्रभवति,

एतद्वै तदिन्द्रशक्तेरेव सत्त्वमृतं महत्त्वम् विश्वत एवोत्तमं सन्महत्तमं भवति ।। तस्यैवेयमनुश्रुतिः—

"न सेशे यस्य रोमशं निषेदुषो विजृम्भते ॥
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या३कपृद् विश्वस्मादिन्द्र उत्तरः॥"
इति (ऋ० मं० १०, ८६, १७)

शचीपौलोमी

अस्मिन् वै लोके प्रत्नाः प्रत्नतमा यार्योषितः, बभूवुः । अमुष्मिन्वे लोके दिव्या देवतात्मानः स्त्रियो बहुधा पप्रथिरे पूर्वाः, सुवीरास्ता वीरपत्न्यः, ऐन्द्रेणैव तेजसा स सुवीर्येण वीरसुवः सत्यः, तपसैव ऋषिकास्ताश्च मन्त्रदृशः, ब्रह्मवादिन्य एव बभूवुः, इन्द्र इवैव विश्वेष्वेव वीर्येषु कर्मसु प्रविशिष्टाः, ता विजयिन्यः प्रबभूवुः, आत्मन एव वीर्यं तदैन्द्रमेव सत्त्वं छन्दसैव वाचा सन्ददृशुः, स्वमात्मानमेवेन्द्रशक्तिं तुष्टुवुः ।

एतद्वै शची पौलोमी ऋषिका तपसाऽन्वपश्यत् । तदृचा वाचाऽन्ववदत् ॥

"उदसौ सूर्य इति" वै तत्प्रथितं सूक्तं तत् षड्र्चमानुष्टुभम्, आत्मस्तुति दैवतं, सत्त्वं तद्दर्शनं दिव्यमेव भवति ॥

अथैषा प्रथमाऽनुष्टुप्

"उदसौ सूर्यो अगादुदयं मामको भगः ॥
अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥
इति १०, १५९-१

=

यो वा असावादित्यो दिवि तपन् सहसाऽहरहर्ज्योतिषाऽभ्युदेति । ऐन्द्र एवायं ज्योतिरात्मा, इन्द्रशक्तेः शच्यास्तस्याः, ऐन्द्या एव वाचोऽभ्युदितं ज्योतिषः सत्त्वम्, तस्मादमुनैव सौर्येण तेजसा संश्लिष्टा तेजसैवावृता लिप्सा सती स्वं पतिं तं वृणाना अमुष्यैव सुवीर्यं ससं सहमानाऽमुमेवाध्यतिष्ठत् । तस्मादसौ विश्वस्याधिपतिः स शचीपतिरिन्द्र एव प्रभवति ।

अथेयमनूक्ता द्वितीया ॥

"अहं केतुरहं मूर्धाऽहमुग्रा विवाचनी ॥
ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्

वाग्वै सा स्वयं ज्योतिरात्मा शची सती, स्वेनैव ज्योतिषा विश्वत

एवोर्ध्वमभ्युदियायाग्रे, तस्मादेवास्य विश्वस्यैव केतुः, केतुरिवैवोच्चतमा सा प्रकेतु सत्त्वा, विश्वस्यैव प्राणसत्त्वा सा, ऽभ्युदगात् उत मूर्धाऽस्य विश्वस्य द्यौरिव द्योतते, व्योम सत्त्वा सा व्योममात्रैव परमा, वाग् वै सा शची विश्वस्यैव प्रशास्त्री यमुग्रा वज्रमिवैवोदिता सोऽग्रवाचा। सती विश्वस्यैव प्रभवति, अग्रेणैव प्रतिशास्त्रेण संशितेन छन्दसैव मुखेन उग्रेणैव प्रति शासनेन विविशिष्टेन प्रशास्त्री, सेन्द्र इवैव प्रभवति।

तस्मात् साऽहमुच्चितेरेवात्मानं प्रति सन्ददर्श, सर्वेषामेवाक्षराणां मूलमात्मानं, साक्षरात्मानमेव तपसाऽन्तः साक्षादेव सन्ददर्श, तस्या एव प्रसानं चोत प्रचेतनं कर्म, उभाभ्यामेवोपस्पृष्टं क्रतुमेवानुसंस्पृत्य, ऐन्द्र एव सूर्योऽसावनुवर्तते नित्यम्, अथो पुनरसौ सूर्यः स ऐन्द्रः, ~~स ऐन्द्रः~~, कामयमानायाः शच्याः पतिः एव यथाकामं सोऽनुसञ्चरतीह सर्वतः, एतद्धै तस्याः परं सत्त्वम्

=

अथेयमनूक्ता तृतीया

"मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट्"
उताहमस्मि सञ्जया पत्यौ मे श्लोक उत्तमः ॥ ३॥

इयं सा वीर प्रसूः शची सैन्द्रेणैव वीर्येण, विश्वासामेव प्रजानां नियन्त्री माता, य इमे वीरवत्तराः पुरुषाः ऐन्द्रेणैव तेन सहसा प्रसूताः ये सुवीराः सर्व एव ते शचीप्रसूता भवन्ति। तस्मादेव ते शत्रूणां विशसने प्रभवन्ति, या वै पुनः सा वीर प्रसूः सती प्रसूता, सा दुहिता शच्या एव सती तेजसैन्द्रेण विराजते। विश्वत एव प्रकाशते स्वेन सुव्रतेन वीर्येणैव कर्मणा। अथो पुनः सेयं शची स्वयमिन्द्रशक्तिः सती ऐन्द्रेणैव वीर्येण विश्वमेतदभिजयति, तस्मादेव सञ्जया सा जयित्री विश्वस्यैव प्रभवति, तस्या एव पतिः स शची पतिः, वाच एवाधिपतिः स उत्तमश्लोकः सुकीर्तिः, स सत्यमन्त्रः सन् स्वयं विश्वस्यैवास्य प्रभवति ॥

अथेयमनूक्ता चतुर्थी ॥

"येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः ॥
इदं तदक्रि देवा असपत्ना किलाभवम् ॥ ४॥

येन वै दिव्येन वीर्येण येनैव हविषान्नेन, यज्ञियेन स्वाहाकृतेन सुहुतेन भोग्येनोत भोगेन, तेन, रसस्यैव समस्य सोमस्य प्रणीतस्य प्रहर्षेण, स इन्द्रः सर्वेष्वेव कर्मसु प्रकृष्टः, स सर्वत एव स्वतन्त्रः समभवत्, दिव्यो वसन् स तेजस्वी सन्नेवोत्तमः, विश्वेषामेव श्रेष्ठो वरिष्ठः स बभूव तेजसा, स्वेनैव सुवीर्येण सर्वमेतत् परमं शच्या एव शक्तेः सुसत्त्वम्, तथा शची स्वेन सत्त्वेन स्वामिन्द्रं तं वीरवत्तमं चक्रे स्वयम् ॥ तस्मादेव सा शचीयमस्मिँल्लोके, उतामुष्मिन्वै परस्मिन्, सर्वेष्वेव भुवनेषु, असपत्नैव प्रबभूव, तस्माद् सपत्नैव स्वयं सती शची सा सर्वानेव सपत्नान् सञ्जघान, विश्वमेवैतत् संविजिग्ये, विश्वानेवाभिभूय स्वेन वीर्येण स्वयमेव राजते, शच्या एव सत्त्वमेतत् परमं दिव्यमेतामृतं सत्यम् ॥

=

अथेयमनूक्ता पञ्चमी

"असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी ॥
आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव ॥ ५ ॥

=

अथो पुनरियं शची सेन्द्रशक्तिः, सर्वासामेव सपत्नानां प्रहन्त्री, स्वयमेवासपत्नी विश्वमेवेदं जयन्ती, विश्वानेवान्यानभिभवन्ती सती विश्वस्यैवास्य सम्राज्ञी प्रभवति। इन्द्र इवैव राजते, सेयमेव शची पुनः, अन्यासां वै शक्तीनां सुचेतसां वर्चः, तत्प्रतिबलं तेजः अस्थिराणां लघु सत्त्वमिवैव स्वेनैव तेजसा प्रचिच्छेद तपसा स्वयम्

अथेयमनूक्ता षष्ठी

"समजैषमिमा अहं सपत्नीरभिभूवरी ॥
यथाहमस्य वीरस्य विराजानि जनस्य च ॥ ६ ॥

=

इति वै सर्वा एव सपत्नी र्विद्विषन्तीः, अन्येषां ता अभिभवन्तीः शक्तीः, अन्यानभिभावयन्तीः, सेन्द्रशक्तिरेव स्वयं स जिगाय, यथा वा अस्मिँल्लोके, उतामुष्मिन्वै परमे, इन्द्रस्यैवास्य

सुवीरस्याधिपतेः स्वस्य, दिव्यस्यैव देवतात्मनः, विश्वेषामेव देवानां मानुषाणां च, सा शचीयं स्वतन्त्रा सम्राज्ञी प्रभवेत् स्वयम्, तथैवेदं सर्वमेव विजिग्ये, सा शची स्वेन सुवीर्येण, तस्मादिन्द्रस्यैव सत्वं विश्वत एवावरीवर्ति सत्यम्, शच्या एव सत्त्वमेतत् परमम् पूर्णम् ॥

=

इति वा अस्मिँल्लोके सर्व एवेमे पुरुषाः, पराग्दृश एव भवन्ति। तस्मात् पराचीनमेवार्थं प्रपश्यन्ति, पराञ्चमेव सन्तं बहिर्ध्येव प्रतिपद्यन्ते, ये वै पुनः प्रत्यग्दृशास्ते सर्वमेवार्थं प्रतीचीनमेव प्रतिपश्यन्ति, प्रतीचीनमेव सन्तं तस्मिन्नन्तर्ध्येव प्रति विन्दन्ति, वाग्वा इयं शची स्वयं प्रत्यक्षं ब्रह्मैव सती पुनः, परोक्षं तत्परमं स्वमर्थं ब्रह्मैव प्रत्यक्षमिवैवानुवदति, तस्मादेव सा ब्रह्मवादिनी सम्बभूव समृद्धा, इन्द्र एव तत्परमं ब्रह्म सत्यं, स वै रेव सत्त्वैः प्रपूर्णम्। विश्वत एवास्मादतिरिक्तम् विश्वत एवावरीवर्ति, तत्परमं वस्तु सत्यं स्वानुभूतं शचीयं तपसाऽन्तः साक्षादेवानुभूयैव छन्दसैव वाचाऽन्ववदत् ॥

ऐन्द्रेणैव सत्वेन ब्रह्मणा वागियं प्रभवति, इन्द्र एव परमः पुरुषस्तत्परं ब्रह्म, ब्रह्मात्मैव स इन्द्रः, स्वं परं सत्वं समर्थयितुं स्वयं, शक्तेरेव सत्त्वेन चित्तेः, वाचा एव स्वरूपेण सा माविर्बभूवाग्रे। तस्मात् सर्वमेवेदं स्वमन्तरेव समृद्धं, तपसाऽन्तःसन्दृशैवानुवेद्यं, आत्मन्येव विदितं स्वानुभूतमेव सत्यं भवति। अथो पुनस्तथा स्वानुभावेनैवोदितं सर्वमेव सत्यं भवति।

एतद्वै सत्यमन्त्रं सत्वं तद् इन्द्रशक्तेः वाच एव सत्यम्

अथो पुनरस्मिँल्लोके योषितः, साक्षादेवैता अबलाः अधीराः अवीरा अविदुष्यः, अन्येषां ता आश्रयित्र्यः, वचनेवानिरुग्राः करणे दुर्बलास्ता इमा भवन्ति, इति वै सा इन्द्र सती शची, अन्यावनितेव निसं वसन्ती, अवीरेति मन्यमानः कःस्विद्विवदत्येव शठः छलेनैव वचसा वृथा, यथा वा अमुमिन्द्रं तं परमं पुरुषं सन्तं, परोक्षमेव संवसन्तं, वैद्युतेनैव ज्योतिषा उत प्रचेतनेनैव सत्वेन विश्वतः समन्तर्हितं, विश्वेषामेव पुरुषाणामन्तः गुप्तमेव सन्तं तममन्यमानाः, इन्द्रः स नास्तीत्येव वदन्ति। यदि वै स इहास्तीन्द्रः, अग्निरिवैवोत सूर्य इवैव परिदृश्येत नित्यम्, तथा तमिन्द्रं प्रत्यक्षं को वै सन्ददर्श, को वै पुन द्रष्टुं प्रभवति। असन्तं तं द्रष्टुं कथमिवैव भाव्यम्, तस्मादेव तं वृथा वाचा किमिति स्तुवन्ति।

तस्मात्स इन्द्रो नास्तीत्येव विवदन्ते "नेन्द्रो अस्तीति", एवमेवेन्द्र सतीं तां शची मसतीं, उतैनामवीरामसमर्थामबलां तामकिञ्चित्करीं मन्यन्ते । नैव तत्सत्यम् न यथार्थम् । यत एवास्मिँल्लोके मनुष्याः, उतामुष्मिन् वै विश्वेदेवाः परमं तमिन्द्रं प्रचेतनं, उतैन्द्रीं शची तामिन्द्र पत्नीं सम्मानयन्ति । तस्मादियं विरिणी सा वीरपत्नी वीरसूः, इन्द्र इवैव सर्वेष्वेवार्थेषु, उत वीर्येषु वीर्यतरेषु कर्मसु प्रभवति । अथो यत एव स इन्द्रो विश्वस्मादेव वरिष्ठः स उत्तमः प्रथितः, तस्माद् इन्द्रस्यैव शक्तिरियं शची, ऐन्द्रेणैव वीर्येणाभ्युदिता विश्वस्यैव प्रभवति ।

एतद्वै स्वयमिन्द्राणी ऋषिका तपसाऽन्वपश्यत् । तदृचा वाचाऽन्ववदत् ॥

"अवीरामिव मामयं शरारुरभि मन्यते ॥
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥"
इति (ऋ०मं० १०, ८६, ९)

अथैतदनूक्तं भवति ॥

"संहोत्रं स्म पुरा नारी समनं वाव गच्छति ॥
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥
(ऋ०मं० १०, ८६, १०)

अस्मिन्वै लोके पुरा खलु वै युगे ऋषीणां प्राचां योषितः देवानां वै दिव्यं यजनं, उताह्वानं तेषां सम्माननं चोत समनं तत्समनस्त्वं । संविन्दते स्मेति प्रथितं सर्वम्, ऋषय इवैव यज्ञे देव यजने, यजमानस्य पत्न्यस्ता यज्ञ पत्न्यः सत्यः, सर्वेष्वेव कर्मसु समाना भागिन्यस्ता बभूवुः, ऋषय इवैव पुनस्तपसा ताः सत्यमन्त्राः सत्यः मन्त्र द्रष्टा वै ऋषिकास्ता ब्रह्मवादिन्य एव बभूवुः, सिद्धमन्त्रास्ताः स्वानुभावेनैव सिद्धस्यार्थस्यानुवादिन्यः सत्यः, विश्वस्मै समिष्टाय विश्वस्यैव समृद्ध्यै प्रबभूवुरित्यनुश्रूयते, छन्दसैव मुखेन ब्रह्मणाऽऽविर्दितं सन्महीयते सर्वैः ।

तस्मादसौ शचीन्द्रपत्नी सेन्द्रशक्तिः सतीयम्, ऋतस्य वै सत्यस्य धरित्री, अमृतस्य वै वेधाः सवित्री, संविदः सद्रसस्य धात्री प्रदात्री, वीरसूः सा वीरपत्नी, स्वयमेव वीरिणी सा सुवीरा सा सुवीर्यवतीति ऋषिभिर्महीयते । यत एव स इन्द्रो विश्वस्मादेवास्मात्सन् वरिष्ठः, स्वेनैव सुवीर्येणोर्जति । तस्मादिन्द्र पत्नी सेन्द्रशक्तिः सती, इन्द्र इवैव विश्वस्मै समिष्टाय प्रभवति ॥

अथैतदनूक्तं भवति

" इन्द्राणीमासु नारिषु सुभगां महमंश्रवम् ॥
नह्यस्या अपरं च न जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥

(ऋ० १०-८६, ११)

इयमिन्द्राणी सेन्द्रशक्तिः, विश्वासामेव योषितां परा वरेण्या, उत शक्तीनां सा वरिष्ठा, इन्द्र इवैव शरण्या, सुभगा सा सुभद्रा, विश्वाभिरेव भूतिभिः पूर्णा, विरसूरिति श्रूयते,

"मम पुत्राः शत्रुहणः" इति वै तदनुश्रुतिः ।

तस्मात्तस्याः परं चापरं चान्यं च तत्समानं सत्त्वं नैव किंस्विद् भवति । यस्मात् स इन्द्र एव तस्याः पतिरजरः सोऽमृतात्मा, नैव जीर्यते जरया, नैव म्रियते मृत्युना, तस्मादिन्द्र इवैव सेन्द्राणी इन्द्रेणैव समेन स्वेन रसेनाभ्युदिता, अजरामृता सती विश्वस्मिन्नेव राजते, इन्द्रशक्तेः सत्त्वमेतत् महित्वं परमेवामृतत्वम् ।

एतद्धै तदिन्द्र एव तपसा सन्दृशा संविविदे ।
छन्दसैव मुखेन ब्रह्मणा वाचाऽनूचे स्वयम्

"इन्द्राणीमासु नारिष्विति वै तदनुश्रुतिः ॥

=

॥ इन्द्रशक्तिः ॥ अहंश्चितिः ॥

इन्द्रो वै यस्मात् परः स पूरुषः, परमः स आत्मा ब्रह्म बृहन्, ब्रह्मणैव स्वया वाचा परयैवोपसंहितः, सन् प्रचेतनः, स्वेनैव सत्त्वेन सोऽहंश्चिता स्वमात्मानमेव संविते,

सत्य मेवाप्रियं स्वयम्। परोक्षमेव सन्तं सोऽहञ्चिता स्व-
मात्मानमेव परमं तमिन्द्रं, प्रत्यक्षमिवैव सन्ददर्श स्वयमात्मन्य-
न्तः, सोऽयमेवा परोक्षः सन्नभ्युदियायान्तः प्रत्यङ् सुसन्दृक्,
तदिन्द्रस्येन्द्रत्वम्, तस्मात् सोऽयमिन्द्र एवाहञ्चिताऽन्वेत्यनु-
स्यूतः, विश्वेषामन्तः स विश्वासामेव वाचां साक्षराणां सस्वराणां
सन्निनदानां बिन्दु मुखं तत्परमं पदम्, सर्वैरेव सत्त्वैः समृद्धं
पूर्णमेव तद् भवति। विश्वेषामेव भूतानां तत्प्रतिष्ठा, सोऽह-
मेवेन्द्रः स इन्द्र एवाहमिति वै प्रत्येति चित्तिभिः संविदा
सुसन्दृशा, विश्वेषामेव देवानां स आत्मा, उत विश्वेषामेव
मनुष्याणां प्राणभृतामान्तरः सोऽयमन्तर्हितश्चेतते चिता,
तस्मादेव स प्रचेतनः सोऽहं चितैव प्रतीयाय स्वमात्मानं
स्वं विश्वरूपं, विश्वानेव देवान् उत मनुष्यान् प्राणभृतः,
स आत्मसादेव सञ्चकार, स आत्मानमेवाहञ्चितैव
विदाञ्चकार, सोऽहञ्चितास्फुरन्निन्द्रः प्रभवति। स
आत्मानमेव साक्षात् चकार, अहमाऽऽत्मनि संस्फुरन् स्वयम्,
स आत्मानमेव संविदा सन्ददर्श, सर्वासामेव संविदां सोऽध्य-
क्षः, सोऽमृतात्मा सत्यस्यैवात्मनः सोऽमृतत्वस्येष्टे,
सुसन्दृगेव स भवति तदिन्द्रस्येन्द्रत्वम्।

एतद्वै परमर्षिः स इन्द्र एव तपसा सन्ददर्श, छन्दसैव
वाचा ब्रह्मणा, स आत्मानमेव तुष्टाव साऽहञ्चिता स्वरन्॥
"अहं भुवं वस्तुनः पूर्व्यस्पतिः" "अहं दाशुषे विभजामि भोजनम्।" "अहं दाशुषे गृणते पूर्व्यं वसु"
इति वै सूक्ताभ्यामेव त्रैष्टुभाभ्याम्॥

इति वै सोऽयमिन्द्रः प्रचेतनः सन्नेवामृतात्मा परमः सोऽह
ञ्चिता यत्र संस्फुरति, यत्र वै पुनरयमहं चित् स्वं स्वरति।
यदहन्धियाऽभिमन्यते, यदहन्धियाः समिन्धति। यद्वै चिता
संवित्तेऽहं हृदाऽऽत्मनि, यदहं चित् स्वरेणैव वाचाऽनुस्वरति,
सर्वत्रैव तत्रेन्द्रस्यैव सत्त्वमन्तर्हितं, सर्वत्रैव तत्रेन्द्रस्यैव सत्ता,

तस्माद् विश्वत एव तत्र तदहञ्चितेरेव सत्त्वं प्रतितिष्ठति,
सर्वा एवताः समाना इन्द्रस्यैव विभूतयो भवन्ति, ताभिरेव प्रपूर्णः

स इन्द्रः, सोऽयमहञ्चिता प्रपूर्णः, इन्द्रेणैव पुरुषेण परमेण ब्रह्मणाऽऽत्मना, सोऽहञ्चितेः प्रत्ययः सुपूर्णः, तस्माद बिन्दुरिवैव तदहं पदं सत्प्रत्ययं पूर्णं भवति ॥ इति वै विश्वमेवेदमहञ्चिता प्रपूर्णं, तदहञ्चितेः पुरुषेण विश्वमेवेदं पूर्णम् ।

तस्मात्तदैन्द्रादहञ्चितेः प्रत्ययादन्तरेण यच्चकिञ्चिन्न चेष्टते । यत्र वै यच्च किञ्चित् सुवीर्यं तेजः पौरुषं प्रतितिष्ठति ॥ तदहं चितेरेव सत्त्वम् समस्तं भवति, तस्यैवेयमनुकृतिः साऽहङ्कृतिः । " नेन्द्रादृते पवते धाम किञ्चन " इति ऋषिश्रुतिः ॥

यो वै परस्मात् पुरुषः परमः स आत्मा ब्रह्म बृहत् ॥ तदकिञ्चिदिवैवासंवस्तु सत्यम् । स वै सन्नेवाग्रे बिन्दुरिवैव पूर्णः, तदतीवास निरात्मकं परमं ह्यणीयः परं गुह्यम् तदमात्रम्, तस्मात् तत् स्वमात्मानं न किञ्चिद्विवेद । कःस्विदिवैवास सोऽग्रे प्रचेतनः केवलः सन् निरिन्द्रियो निर्विशेषः, न स्त्री न पुमान् न नपुंसकं पुनः, अव्ययात्मकमेवास स्वयम्, तस्मात् कस्माच्चिदेवाकस्मादन्तः अहमित्येव तत् स्फुरत् किञ्चिदेव बभूव ।

अथो पुनस्तदहञ्चितिमेवानुतपस्यन्, कोऽहमित्येव विमृशन् संस्फुरन्नेव सोऽन्ततः अहमिन्द्र इत्येव संविविदे स्वयम्, आत्मनस्ताहञ्चितिमेवानु संचरन्, समुन्मिषन् पुनः इन्द्रमेवात्मानं सन्ददर्श, तदिन्द्रस्येन्द्रत्वं परमं, साऽहञ्चितिरेव प्रथमा संवित् परमा, वागेव सा परा भवति ।

अथो पुनस्तामहञ्चितिमेवानुभूय भूयः, इन्द्रस्येवात्मनः सत्त्वं सत्यं तत्, स्वमेव रूपं विमृशन् परमं तं वशिनं मेने स्वयमन्तः । साऽहम्मतिः स मनस्का आत्मन्येव प्रतिष्ठायै प्रभवति । तस्मादिन्द्र एव वशी स्वयम्प्रभः सम्बभौ ।

अथो पुनस्तामहम्मतिमेवानुतपस्यन् आत्मन एवेन्द्रस्य सत्त्वं विमृशन् विश्वाभिरेव कृतिभिः शक्तिभिः पूर्णम् ।

स आत्मानमेव साक्षाच्चकार, स ईशानः स्वयमेवाऽभवत्, सोऽहङ्कृतिमेवानुतपस्यन् पुनः, स्वेनैव वीर्येण स्वेनैव सत्त्वेन संविदा कामेन समृद्धः विश्वाभिरेव कृतिभिः प्रवृद्धः, पूर्णः, चिताऽभ्युदितो विश्वस्यैवेष्टे स्वयम्। तदिन्द्रस्येन्द्रत्वम्। स विश्वत एवातिरिक्तः, विश्वस्मादूर्ध्वः स उत्तमः सन् महीयान्, तस्या एवाहङ्कृते रूर्जितः विश्वमेवाधि तस्थौ, उत विश्वत एवाति तस्थौ, इति वै साहङ्कृतिनेन्द्रेणैव विश्वमिदं पूर्णम्। तदिन्द्रस्येन्द्रत्वम् ॥

तस्मादेवेन्द्रं विश्वतः परं नात्येत्य परः कश्चित्, इन्द्रो न पराजीयते कुश्चित्, स्वेनैव सुवीर्येण विश्वमेतदभि जयति, सोऽमृतात्मैव स्वयं सन् पुनः, नैव मृत्योर्वशमभ्येति कुतश्चित् ॥

इति वै तदिदं सर्वमात्मन एव वीर्यं परमं सत्त्वं तन्महत्त्वं इन्द्र एवाहश्चितेस्तपसा सन्ददर्श, तदृचा वाचा छन्दसा ब्रह्मणैव मुखेन प्रतिदर्शयति।

"अहमिन्द्रो न पराजिग्य इद्धनं न मृत्यवेऽवतस्थे कदाचन"

(ऋ० मं० १०, ४८, ५)

"अभी३दमेकमेको अस्मिन्निष्षाट्"

(ऋ० मं० १०, ४८, ७)

"अहमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना।

(ऋ० मं० ८, १००, ४)

"अहं ता विश्वा चकरं न किर्मा दैव्यं सहो वरते अप्रतीतम् ॥

(ऋ० मं० ४, ४२, ६)

इति वै तदनुश्रुतिः।

तदेतदनूक्तं भवति
"आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनाति धाम।
ते मा भद्राय शवसे ततक्षु रपराजित मस्तृत मषाळ्हम् ॥

इति (ऋ० मं० १०,४८,११)

=

॥ इन्द्रशक्तिः वाग्देवता ॥

वाग् वै सा परमा स्वयमेवेन्द्रशक्तिः, सा सती माता देवता परा, परमस्य वै पुरुषस्य ब्रह्मण:, इन्द्रस्यैवात्मनः (सतः), विश्वासामेवात्मनाश्रितां, वागेव सा परमा प्रतिष्ठा, प्रथमा, वाग् वा इयं प्रत्यक्षं ब्रह्मैव सती स्वेन रसेन, ऐन्द्रमेव (सु-)वीर्यं ब्रह्मण्यं तत् परं ज्योतिरन्तः सन्धत्ते स्वयम् ॥ यथा वा इयं पृथिवी (मही), आग्नेयेन ज्योतिषाऽन्तर्वत्नी, यथा वा असौ द्यौरदितिः साऽदिमाता, ऐन्द्रेण वै वैद्युतेन, उतैन्द्रेणादित्येन ज्योतिषा नित्यमन्तर्वत्नी प्रतितिष्ठति ॥

"यथाऽग्निगर्भा पृथिवी, द्यौरिन्द्रेण गर्भिणी" इति वै तद् यजुषा समिष्टम् ॥ (कृ० यजु०)

एवं वा असौ व्योम मात्रा, वाक् परा सा द्यौरिवैवा मात्रा, ऐन्द्रेणैव सुवीर्येण ज्योतिषा नित्यमन्तर्वत्नी भवति, वाग्मात्रैव स्वयं सती विश्वमेवेदं प्रति मिमाति छन्दसा। अमात्रमेवेदं तं परमं पुरुषं, तत्परं ब्रह्म चिदात्मानम् (मिम)। अमात्रैव सती सा वागेव नित्यमात्मन्यन्तर्गर्भे सन्धत्ते स्वयम्। तस्मादेव ब्रह्मेन्द्रगर्भा सा वागेव माता प्रमात्री ब्रह्मणेन्द्रेणात्मना सा समाना संवित्ते स्वयम् ॥ इति वै यत्र यत्र वै वाक् प्रतितिष्ठति, यत्र वै साऽनुवर्तते नित्यं, ऐन्द्रेण वै ब्रह्मण्येन तेजसाऽन्तर्वत्न्येव भवति। तस्माद् वागेव विश्वमेतत् प्रसूते, विश्वस्यैवाधिपतिं तमिन्द्रं विश्वेषामेव सवितारं, अमुमेव दिव्यं सवितारं वागेव स्वं पतिं तं प्रसूते।

(अनुमेव प्रति प्रचोदयति, स्वयैव चिता वाचा छन्दसा ब्रह्मणा समर्थयति, तं परमं परोक्षं सन्तं स्वेनैव मुखेन प्रत्यक्षं प्रति बोधयति, इति वै तदिन्द्रस्यैव ब्रह्मणः पुरुषस्यात्मनः, सर्वै रेव सत्त्वैः समृद्धा सा छन्दसैव मुखेन ब्रह्मणा, तत्परमं ब्रह्म पूरुषं तमिन्द्रं परं, परमं स्वमात्मानं सन्तं साक्षादेवानुवदति, विश्वस्मै तत्प्रत्यक्षमेवा श्रावयति, तस्मादेव वाग् वै सा ब्रह्मवादिनी सम्बभूव ॥

एतद्धा आम्भृणी आम्बिका वागेव स्वयं तपसाऽन्वपश्यत्। तदृचा वाचाऽन्ववदत् ॥

"अहं रुद्रेभि र्वसुभिश्चरामि" इति वै छन्दसा त्रैष्टुभेन, ऐन्द्रमेव तत् त्रैष्टुभं छन्दः, "इन्द्रस्य त्रिष्टुबिह भागो ह्यन्दः" इति वै तदनुश्रुतिः, इति वै त्रैष्टुभं तत्सूक्तं महर्चि भवति।

=

वाग् वै सा पूर्णा परमा सेन्द्रशक्तिः, सा ब्रह्मसत्त्वा सती, परमस्य वै ब्रह्मणः तस्यैवेन्द्रस्यात्मनः पुरुषस्य, साऽहंश्चिता संस्फुरत्यजस्रम्, वाच एव तत्सत्त्वम्, सर्वासामेव वाचां साक्षराणां बीजम्, परमेणैव तदमात्रेण बिंदुनैव पूर्णेन तदा प्लुतं भवति, साऽहंश्चितैव पुनः, विश्वेषामेव देवानां साऽन्तरात्मना संहिता प्रभवति।

वाग् वै सा परमा विश्वैरेव तै र्देवैः सह सञ्चरति, विश्वानेव देवान् स्वेनैव सह सा सम्बिभर्ति, रुद्रमुखास्ते देवा अग्निमुखाः, रुद्राश्च वसवश्च आदित्याश्च ते, विश्वे वै देवाश्च वाच एव ते सहचराः, वाग् वै तेषां सहचारिणी भवति।

अथो पुनस्तौ मित्रावरुणौ इन्द्राग्नी चाश्विनौ च ज्योतीरसात्मानौ, वागेव सहसा स्वेन सम्बिभर्ति ॥ सोमोऽसौ रसात्मा तमस्तापहनः, त्वष्टा च स तेजस्वी विश्वकर्मा, असौ पूषोत भगश्च तौ दिव्यौ, विश्वानेवै तान् वागेव सम्बिभर्ति ज्योतिषा सरसेन स्वरेण छन्दसा;

सर्वेभ्यो वै देवेभ्यो मानुषेभ्यः, देवयज्यायै

यजमानेभ्यः सर्वमेव जीवनं सत्त्वं स्वकं, वागेव प्रति ददाति। विश्वमेतद्राष्ट्रं विश्वाभिरेव भूतिभिः पूर्णां वागेव सम्बिभर्त्ति, स्वयमेव प्रतिच्चालयति, ॥

अस्मिन् वै लोके ये मनुष्याः, प्राणभृतो जन्तवः सर्व एव ते लोका वाच एव रसेन प्रति जीवन्ति, ये वा अविद्वांसः ये अचेतसः विश्वस्यैव संविदे सौमनस्याय, वाचमेवोपगच्छन्ति। वाग् वै सा दिव्या देवतात्मा, यं यं वै कामयते स्वमनुव्रतम् प्रतिरक्षितुं स्वयम्, सर्वमेव तं पुरुषं सुवीरं वीरवत्तरं कुरुते, ब्रह्माणं तं ब्रह्मविदं कुरुते, छन्दसैव प्रमुखं तमृषिं भावयति, सर्वविदं कुरुते तं सुमेधसं, तदेतद् इन्द्रशक्तेर्वाच एव परं सत्त्वम् ॥

═

अथो पुनर्यो रुद्रो ज्योतिरात्मा स उग्रधन्वा सतिग्मायुधः, विश्वान्येव भूतान्युपसंहरति, दुष्टानां प्रति हन्त्रे रुद्राय तस्मै। ब्रह्मद्विषां हनने, वागेव तद्धनुर्दिव्यं, स्वेन वीर्येण छन्दसा ब्रह्मणोग्रेण, उग्रमेवातनोति। ब्रह्मद्विषस्तान् प्रतिघातयति, स्वेनैव सत्त्वेन रसेन, विश्वानेव प्रति नन्दयति।

असौ वै दिव्यः सविता विश्वेषामेव प्रसविता यः पिता परः, अमुष्यैव भुवनस्यास्य मूर्धनि दिव्ये व्योमन्यन्तः। अमुमेव सवितारं तं पितरं परं, वागेव सा प्रसूते स्वेन रसेन छन्दसा च। अथो पुनरस्य वै पुरुषस्य मूर्धन्यन्तः, सोमं तं दिव्यं रसात्मानं वागेव सा प्रसूते स्वयम्। अनाहता सा स्वन्निनदैव भवति, वाग्वै सा परमा माता, इमानि विश्वान्येव भूतानि, उतैतानि भुवनानि प्रजनयति, विश्वमेतत् प्रत्यूता विश्वत एव राजते सिता ॥

एतद्वैतदिन्द्रशक्तेर्वाच एव सत्त्वं महत्त्वं भवति तस्मादस्मिंल्लोके उतामुष्मिन् वै परमे, विश्वेषामेव विजये वाग् वै सा परमा देवता, तस्मादिन्द्रशक्तिरेव प्रभवति।

इमानि विश्वान्येव वीर्याणि कर्माणि वै वीर्यवत्तराणि अन्यैर्वा समानानि, उतान्यैरसम्भूतानि, पुनरेव—

मसम्भाव्यानि, एकैव सा परमादेवतात्मा सेन्द्रशक्तिः,
सा ब्रह्मसत्त्वा वागेव सञ्चकाराग्रे, ग्प्रजस्रं तानि
कुरुते, प्रतिलवं प्रत्यहं विश्वमेतत् स्वेनैव सत्त्वेन,
ऐन्द्रेणैव वीर्येण, वागेव प्रति चालयति, वाच एव
सत्त्वेन मेव विश्वमेतत् प्रचलति, सुचिरं तत्प्रतितिष्ठति,
विश्वेषां जगतामान्ते च्या प्रलये, वाच एव सत्त्वमन्वा
वर्तते विश्वम्, विश्वेषां वै प्रलयेऽपि पुनः, नाम्नैव
सत्त्वेन वागेवावशिष्यते स्वयम् । इन्द्र इवैवामृता-
त्मा, ब्रह्मैव सती बृहती, सर्वं देवोर्जति, सर्वथैव
राजते, इति वै सर्वमेवेन्द्रशक्तेः सत्त्वं सम्यद्धं
प्रत्यक्षमेवेदं भवति, साक्षादेव तत् सम्पद्यते सर्वम् ॥